प्रायोगिकंसंस्करणम्

# अनिवार्यसंस्कृतम्

## (स्वप्नवासवदत्तम्)

### उत्तरमध्यमा द्वितीयवर्षम्
### (कक्षा-12)

महर्षि-पतञ्जलि-संस्कृत-संस्थानम्,
भोपालम्

# स्वप्नवासवदत्तम्

## उत्तरमध्यमा द्वितीयवर्षम् ( कक्षा-12 )

### प्रथमप्रश्नपत्रम्

कूटसंख्या (801)

प्रकाशकः

महर्षि-पतञ्जलि-संस्कृत-संस्थानम्, भोपालम्

- प्रकाशनवर्षम् – 2019


## सर्वाधिकार सुरक्षित

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भाग को छापना तथा इलेक्ट्रॉनिकी, मशीनी, फोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रसारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार के व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।



### संस्कृतपाठ्यपुस्तकलेखनसमन्वय–मार्गदर्शन–समितिः

1. श्री लोकेशजाटवः, संचालकः, राज्य शिक्षाकेन्द्रम्, भोपालम् — अध्यक्षः
2. डॉ. भागीरथकुमरावतः, सदस्य, म.प्र.पा.पु. स्थायी समिति — सदस्यः
3. डॉ. रघुवीरप्रसादगोस्वामी, सदस्य, म.प्र.पा.पु. स्थायी समिति — सदस्यः
4. डॉ. अशोक पारीकः, नियंत्रक, पाठ्यक्रमः, राज्य शिक्षाकेन्द्रम् — सदस्यः
5. डॉ. एस.ए.एच रिजवी, नियंत्रकः, भाषा राज्यशिक्षाकेन्द्रम् — सदस्यः
6. डॉ. प्रशांतडोलसः, उपनिदेशकः, महर्षिपतंजलिसंस्कृतसंस्थानम् — सदस्यः
7. डॉ. बृजेशसक्सेना, समन्वयकः (पाठ्यक्रमः) राज्यशिक्षाकेन्द्रम् — सदस्यः
8. डॉ. मीता गुप्ता, समन्यवयकः (भाषा) राज्यशिक्षाकेन्द्रम् — सदस्यः
9. डॉ. सत्यजीतपाण्डेयः, महर्षिपतंजलिसंस्कृतसंस्थानम् — सदस्यः
10. डॉ. अशोककुमारव्यासः, राज्यशिक्षाकेन्द्रम् — सदस्यः
11. डॉ. लोकेशखरे, राज्यशिक्षाकेन्द्रम् — सदस्यः
12. डॉ. पी.आर. तिवारी, निदेशकः, महर्षिपतंजलिसंस्कृतसंस्थानम् — सदस्यः सचिवः

### समन्वयकाः –

1. डॉ. सत्यजीतपाण्डेयः, महर्षिपतंजलिसंस्कृतसंस्थानम्, भोपालम्
2. डॉ. अशोककुमार व्यासः, राज्यशिक्षाकेन्द्रम्, भोपालम्
3. रेशमा लाला, महर्षिपतंजलिसंस्कृतसंस्थानम्, भोपालम्

### लेखकगणाः –

1. डॉ. धर्मेन्द्रकुमारसिंहदेवः, राष्ट्रीयसंस्कृतसंस्थानम्, भोपालम्
2. विनोदकुमारशर्मा, शासकी–उच्चतरमाध्यमिकविद्यालयः, गंजबासौदा (विदिशा)
3. डॉ. शीतांशु त्रिपाठी, राष्ट्रीयसंस्कृतसंस्थानम्, भोपालम्

### म.प्र.–पाठ्यपुस्तक–स्थायी–समितिः

- डॉ. गोविन्दशर्मा, ग्वालियरम् — अध्यक्षः
- डॉ. भागीरथकुमरावतः, भोपालम् — सदस्यः
- डॉ. गिरीश–अग्निहोत्री, जबलपुरम् — सदस्यः
- श्री अनिलचतुर्वेदी, इन्दौरम् — सदस्यः
- डॉ. सुभाषगुप्ता, इन्दौरम् — सदस्यः
- डॉ. मुकेशतिवारी, शहडोलम् — सदस्यः
- डॉ. चन्द्रदेव–अष्ठाना, ग्वालियरम् — सदस्यः
- डॉ. नाथूरामराठौरः, दमोहम् — सदस्यः
- डॉ. रघुवीरगोस्वामी, भोपालम् — सदस्यः
- डॉ. पूजा उपाध्याय, उज्जैनम् — सदस्यः
- डॉ. गोविन्द रामानी, हरदा — सदस्यः
- आयुक्तः राज्यशिक्षाकेन्द्रम्, भोपालम् — सदस्यः सचिवः
- आयुक्तः, लोकशिक्षणसंचालनालयः, भोपालम् — सदस्यः
- सचिवः, माध्यमिकशिक्षामण्डलम्, भोपाल — सदस्यः
- प्रबंधसंचालकः, म.प्र.पाठ्य पुस्तक निगम, भोपाल — सदस्यः
- प्रतिनिधिः, राष्ट्रीयशैक्षिकअनुसंधान एवं प्रशिक्षण परिषद् नईदिल्ली — सदस्यः

# प्राक्कथनम्

भारतीयसन्दर्भे संस्कृतस्य महत्त्वं सर्वोपरि विद्यते। इयं भाषा न केवलं सर्वप्राचीना अपितु संस्कृते: संवाहिका भाषा वर्तते। समग्रम् अपि भारतीयं ज्ञान-विज्ञानं संस्कृते एक निहितमस्ति। संस्कृतस्य विश्वजनीनं सर्वकालिकं महत्त्वं विज्ञाय पाठ्यक्रमे संस्कृतस्य नियोजनं सुनिश्चितं वर्तते। पाठ्यक्रमे न केवलं वाङ्मयस्य अपितु तत्र निहितानां जीवमूल्यानां, मानवीयादर्शनां, उदात्तभावानां शिक्षणम् अपि लक्ष्यमेकं विद्यते।

प्रस्तुतपाठ्यपुस्तके प्रकृतमुद्देश्यम् आश्रित्य पाठानां समुचित: सन्निवेश: कृतो विद्यते। अत्र नातिविस्तरेण समग्रस्यापि वाङ्मयस्य संस्कृतवैभस्य, विधानां, प्रवृत्तीनां, तत्त्वानां, रचनाकाराणां परिचय: अत्र प्रदत्त:। एतस्य पाठ्यपुस्तकस्य अध्यनेन न केवलं भारतीयसंस्कृते: परिचय: अपितु संस्कृतभाषोपनिबद्धस्य वाङ्मयस्य अपि परिचयो भविष्यति। अधोलिखितानि पाठ्यपुस्तकस्य उद्देश्यानि संस्थानेन प्रकल्पितानि- तद्यथा-

(1) संस्कृतभाषाया: तत्साहित्यस्य च अध्ययनाय प्रोत्साहनम्।

(2) सोद्देश्यसंस्कृतशिक्षाया: पारम्परिकाध्ययनं वर्तमानशिक्षाप्रणाल्या सह योजनां प्राचीनार्वाचीनपद्धत्योर्मध्ये समन्वयस्थापनम्।

(3) 'प्रायोज्य-प्रणाली-विज्ञानम्' इत्यनेन अधिकृत्य नावाचारेण संस्कृतशिक्षाया: सञ्चालनम्।

(4) संस्कृतवाङ्मये निहितज्ञानस्य व्यावहारिकरूपेण छात्राणां सम्मुखे प्रस्तुतीकरणम्।

(5) संस्कृते विद्यमानाया: भारतीयसंस्कृते: ज्ञानम्।

(6) संस्कृतवाङ्मये निहितानां मानवीयजीवनमूल्यानाम् अवगमनम्।

(7) संस्कृतवाङ्मये अन्तर्निहितस्य ज्ञानविज्ञानस्य भारतस्यातीतगौरवस्य च युगानुकूलसन्दर्भे प्रस्तुति:।

इतोऽपि पाठ्यपुस्तकमाध्यमेन अस्माकं देशस्य सांस्कृतिपरम्पराणां निदर्शनं प्रजातान्त्रिकराजव्यवस्थाया: ऐतिहासिकं प्रतिफलनं, साहित्यिकप्रवृत्तीनां ज्ञानम् राष्ट्रिया: चिन्ता: चिन्तनञ्च अत्र समाहितं वर्तते। प्रस्तुतपाठ्यपुस्तकनिर्माणे संस्कृतशिक्षाया: लक्ष्येषु तथ्यात्मकराष्ट्रस्तरीया: सर्वमान्य-व्यापक-शैक्षणिक-पाठ्यक्रमस्य निर्धारितोद्देश्यानां स्वीकृतसिद्धान्ता: सहायका: अभवन्।

आशासे यत् इदं पाठ्यपुस्तकं संस्कृतविद्यालयानां कृते निर्धारितं 'सा विद्या या विमुक्तये' इत्यस्य ध्येयवाक्यस्य प्रतिपूर्तिं करिष्यति तथा च उपर्युक्तानाम् उद्देश्यानां पूर्तिरपि सफलया करिष्यति इति।

निदेशक:
महर्षि-पतञ्जलि-संस्कृत-संस्थानम्
भोपालम्

**प्रथमम् — अनिवार्यसंस्कृतम् (कूटसंख्या – 801) 100**

क. **स्वप्नवासवदत्तम्** (भासविरचितम्) 30

ख. **सम्भाषणम्** 20

पाठ्यग्रन्थः– भाषाप्रवेशः – (द्वितीयभागः, 14 तः 27 पाठाः)
(प्रकाशनम् – संस्कृतभारती )

ग. **न्यायसिद्धान्तमुक्तावली** (जलनिरूपणतःप्रत्यक्षखण्डान्ता) 50
(श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता)

**सूचना** – व्याकरणच्छात्राणां कृते न्यायसिद्धान्तमुक्तावली
(जिन छात्रों ने वैकल्पिकप्रश्नपत्र में नव्य या प्राचीन व्याकरण का चयन किया है, उनके लिये न्यायसिद्धान्तमुक्तावली)

**अथवा** **लघुसिद्धान्तकौमदी** ( ण्यन्तप्रकियातः अन्तं यावत्)
(वरदराजाचार्यविरचिता)

**सूचना** – व्याकरणेतरच्छात्राणाम् कृते लघुसिद्धान्तकौमुदी (जिन छात्रों ने वैकल्पिकप्रश्नपत्र में नव्य या प्राचीन व्याकरण के अतिरिक्त अन्य विषय का चयन किया है, उनके लिये लघुसिद्धान्तकौमुदी )

## ईकाईवार पाठ्यक्रम एवं ब्लू प्रिन्ट (अंक योजना अर्थात् प्रश्न पत्र का स्वरूप)

## कक्षा – 12वीं (उत्तरमध्यमा द्वितीयखण्ड)

**निर्देश** – वस्तुनिष्ठ प्रश्न प्रश्नपत्र के आरंभ में दिये जायेंगे।

1. प्रश्न क्रमांक 1 से 5 तक वस्तुनिष्ठ प्रश्न होंगे जिसके अन्तर्गत रिक्त स्थानों की पूर्ति एक वाक्य से उत्तर मेचिंक, सही विकल्प तथा सत्य–असत्य का चयन आदि के प्रश्न होंगे। प्रत्येक प्रश्न में (1×5×5=25) अंक निर्धारित है।
2. वस्तुनिष्ठ प्रश्नों को छोड़कर सभी प्रश्नों में विकल्प का प्रावधान रखा जायेगा। यह विकल्प समान इकाई से तथा समान कठिनाई स्तर वाले होंगे।
3. कठिनाई स्तर – 40ः सरल प्रश्न, 45ः सामान्य प्रश्न, 15ः कठिन प्रश्न।

**विषय – अनिवार्य संस्कृत काव्यम् (801)** **पूर्णांक – 100, समय – 3.00 घण्टे**

| क्र. | पाठ्यक्रमानुसार इकाईयां | इकाई पर आवंटित अंक | वस्तुनिष्ठ प्रश्न | अंकवार प्रश्नों की संख्या | | | | | | कुल प्रश्न |
|---|---|---|---|---|---|---|---|---|---|---|
| | | | 1 अंक | 2 | 3 | 4 | 5 | 6 | 10 अंक | |
| 1(क) | स्वप्नवासवदत्तम् (1 – 2 अंक) | 10 | 05 | – | | | 01 | | | 06 |
| 2 | स्वप्नवासवदत्तम् (3 – 4 अंक) | 10 | 03 | 01 | | | 01 | | | 05 |
| 3 | स्वप्नवासवदत्तम् (5 – 6 अंक) | 10 | 03 | 01 | | | 01 | | | 05 |
| 4(ख) | भाषाप्रवेशः 14 तः 20 पाठंयावत् | 10 | 02 | 04 | | | – | | | 06 |
| 5 | 21 तः 27 शपाठंयावत् | 10 | 01 | 02 | | | 01 | | | 04 |
| 6(ग) | न्यायसिद्धान्तमुक्तावली जलनिरूपणतः तेजोनिरूपणपर्यन्तं | 10 | – | – | | | | | 01 | 01 |
| 7 | वायुनिरूपणम् आकाशनिरूपणं च | 10 | 03 | 01 | | | 01 | | | 05 |
| 8 | काल–दिगात्मनिरूपणानि | 10 | 03 | 01 | | | 01 | | | 05 |
| 9 | प्रत्यक्षनिरूपणे इन्द्रियनिरूपणं यावत् | 10 | 04 | 03 | | | – | | | 07 |
| 10 | प्रत्यक्षनिरूपणें लौकिकसन्निकर्षनिरूपणतः अन्तं यावत् | 10 | 01 | 02 | | | 01 | | | 04 |
| | कुल प्रश्न | 100 | 25 | 15 | | | 07 | | 01 | 48 |

# अनुक्रमणिका


| क्र. | विवरण | पृष्ठ |
|---|---|---|
| 1. | महाकविभासः | 1 |
| 2. | अङ्कानुसारं 'स्वप्नवासवदत्तम्' | 3 |
| 3. | नाटकस्य कथा (नाट्यवस्तु) | 1 |
| 4. | प्रथमोऽङ्कः | 8 |
| 5. | द्वितीयोऽङ्कः | 22 |
| 6. | तृतीयोऽङ्कः | 27 |
| 7. | चतुर्थोऽङ्कः | 33 |
| 8. | पञ्चमोऽङ्कः | 48 |
| 9. | षष्ठोऽङ्कः | 59 |
| 10. | परिशिष्टं-1 | 72 |
| 11. | परिशिष्टं-2 | 74 |
| 12. | श्लोकाः (नाटकस्य) | 75 |

# ‘महाकविभासः’

## महाकविभासः

**जीवनवृत्तं कृतित्वञ्च**

महाकविभासस्य जीवनचरितसन्दर्भे न कोमपि स्पष्टं विवरणं सम्प्राप्यते। महाकविकालिदासः

मालविकाग्निमित्रस्य प्रस्तावनायां (प्रथितयशसां भाससौमिल्ल) इतिभासं सादरं स्मरति। अनेन सिद्धयति यदयं कलिदासात् पूर्वमेव नाटककारेषु सुविख्यातः आसीत्। भासस्य नाटकेषु तज्जीवनचरितस्य किमपि स्पष्टं विवरणं न प्राप्यते तथापि, भासः उच्चश्रेण्याः विद्वान् आसीत्। तेन वेदाः, शास्त्राणि, स्मृतयः, काव्यशास्त्राणि, नाट्यशास्त्राणि, दर्शनानि, पुराणानि गंभीरतया अधीतानि। स नाट्यकलायाः ज्ञाता आसीत्, कालिदासेन श्रेष्ठनाटकारत्वेन तस्मै मान्यता प्रदत्ता।

**भासस्य नाट्यकृतित्वम् :-** महाकविभासस्य कृतित्वेन साम्प्रतं त्रयोदश (13) नाटकानि

समुपलभ्यन्ते। खीताब्दस्य 1909 ईसवीये श्री टी. गणपति शास्त्री महोदयेन त्रावणकोरराज्यात् एतानि नाटकानि प्राप्तानि।

भासनाटकानि कथास्रोतदृष्टया चतुर्धा विभक्तुं शक्यते।

**(क) उदयन कथा मूलकम्** - (1) प्रतिज्ञायौगन्धरायणम् , (2) स्वप्नवासवदत्तम्।

**(ख) महाभारत मूलकम्** - (3) उरूभङ्गम् (4) दूतवाक्यम् (5) पञ्चरात्रम् (6) बालचरितम् (7) दूतघटोत्कचम् (8) कर्णभारम् (9) मध्यमव्यायोगः।

**(ग) रामायणमूलकम्** - (10) प्रतिमानाटकम् (11) अभिषेकनाटकम्

**(घ) कल्पनामूलकम्** - (12) अविमारकम् (13) चारुदत्तम्।

**एतेषां परिचयः समासतोऽत्र प्रस्तूयते**

1. **प्रतिज्ञायौगन्धरायणम्**- अङ्कचतुष्टयनाटकेऽस्मिन् उदयनस्य वासवदत्तया सह प्रणयः परिणयश्चेह वर्ण्येते।

2. **स्वप्नवासवदत्तम्** - नाटकेऽस्मिन् अष्टौ अङ्काः वासवदत्ता अग्नौ दग्धेति प्रवादं श्रुत्वा यौगंधरायणप्रयत्नात् पद्मावत्या सह उदयनस्य परिणयोऽपहृतराज्यावाप्तिश्च वर्णिता।

3. **दूतवाक्यम्**- एकाङ्कीनाटकमिदं महाभारतयुद्धात् प्राक् पाण्डवार्थं दुर्योधनसंसदि दूतत्वेन श्रीकृष्णस्यागमनं वर्णितम्।

4. **उरुभङ्गम्**- एकाङ्कीनाटकेऽस्मिन् द्रौपदी-परिभव-प्रतिक्रिया-फलस्वरूपं भीमसेनेन गदायुद्धे दुर्योधनोरुभञ्जनस्य वर्णनमस्ति।

**5. पञ्चरात्रम्**- त्र्यङ्कयुक्ते नाटकेऽस्मिन् पञ्चरात्र्यभ्यन्तरे पाण्डवानां प्राप्तिः राज्यप्राप्तेश्च वर्णनं विद्यते।

**6. बालचरितम्**- पञ्चाङ्केषु बालस्यः श्रीकृष्णस्य जन्मतः कंसवधान्तं चरितं वर्णितम् ।

**7. दूतघटोत्कचम्**- एकाङ्कीनाटकमिदम् अभिमन्युवधान्तरं घटोत्कचः श्रीकृष्णस्य प्रेरणया दौत्यमङ्गीकरोति।

**8. कर्णभारम्**- एकाङ्कीनाटकेऽस्मिन् इन्द्रः कर्णं कवचकुण्डलान् याचते।

**9. मध्यमव्यायोगः** - नाटकमिदम् एकाङ्की। अत्र मध्यमपाण्डवो भीमः मध्यमनामकं ब्राह्मणबालं घटोत्कचेन त्रायते। अन्ते पुत्रेण पत्न्या सह मेलनमपि भवति।

**10. प्रतिमानाटकम्**- सप्ताङ्कनाटकेऽस्मिन् रामायणी कथा अस्ति अत्र भरतः स्वपितुः दशरथस्य प्रतिमां दृष्ट्वा पितुर्निधनमवगच्छति।

**11. अभिषेकनाटकम्**- अष्टाङ्कयुक्ते नाटकेऽस्मिन् किष्किन्धाकाण्डादारभ्य रावण वधानन्तरं रामस्य राज्याभिषेकः वर्णितः।

**12. अविमारकम्**- अङ्कषट्कमत्र। राजकुमारस्य अविमारकस्य कुन्तिभोजस्य पुत्र्या कुरङ्गया सह प्रणयपरिणयोऽत्र वर्णितः।

**13. चारुदत्तम्**- चतुरङ्कयुक्तं नाटकमिदमत्र उदारचित्तस्य चारुदत्तस्य वसन्तसेनया वाराङ्गनया सह प्रणयोपमयम् वर्णितम्।

**भासस्य नाट्यकला**- समुपलब्धं संस्कृतवाङ्मयमनुशील्यते चेत् प्राप्यते यत् भास एव नाटककारेषु श्रेष्ठः अग्रणीरिति। नाटकानां बाहुल्येन, विषयवैविध्येन च नाट्यकौशलं वैशद्यं च दृश्यते। नाटकेषु तस्य प्रमुख विशेषताः सन्ति- भाषासारल्यं, कृत्रिमता रहिता, शैली, वर्णनेषु यथार्थता, घटनासंयोजनसौष्ठवं, कथा प्रसङ्गस्य सरलः प्रवाहः, मौलिकता, कल्पनावैचित्र्यञ्च प्राप्यते।

**भाषाशैली** :- भासस्य शैल्यां माधुर्यौजःप्रसादानां त्रयाणां गुणानां समाहारः दृश्यते। भाषा सरला, सुबोधा, सरसा, स्वाभाविकी, सप्रवाहा च । भासः मानवीय मनोवृत्तीनां वर्णने सफलः ।

तद्यथा दुःखं त्युक्तुं बद्धमूलोऽनुरागः, स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषामद् विमुच्येह बाष्पं प्राप्तानृण्या याति बुद्धिः प्रसादम् ।। (स्वप्नवास 4.6)

भासः भारतीयभावानां कविः । तस्य नाटकेषु भावानामुचितं समन्वयः प्राप्यते। यथा- पितृभक्तिः, पतिव्रत्यम्, भ्रातृप्रेम, क्षमाशीलता, त्यागादिकञ्च। पातिव्रत्यं वर्ण्यते यथा-

अनुचरति शशाङ्कं राहुदोषेऽपि तारा,
पतति न वनवृक्षे याति भूमिं लता च।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः।। (प्रतिमा 1.25)

भासस्य नाटकानां लोकप्रियतायाः कारणं वर्तते -सरसता, सरलता, रम्यता च ।

❖ ❖ ★ ❖ ❖

# अङ्कानुसारं 'स्वप्नवासवदत्तम्' नाटकस्य कथा (नाट्यवस्तु)

## पात्र-परिचय

### ( पुरुष-पात्र )

| | |
|---|---|
| **राजा** | - वत्स देश के राजा उदयन |
| **योगन्धरायण** | - उदयन के मंत्री |
| **रुमण्वान्** | - उदयन के दूसरे मंत्री |
| **बसन्तक** | - राजा उदयन के विदूषक (शृङ्गारसहायक) |
| **ब्रह्मचारी** | - लावाणक ग्राम के छात्र |
| **( 1 ) काञ्चुकीय** | - मगध के राजप्रसाद में अन्तपुर के अधिकारी ब्राह्मण। |
| **( 2 ) काञ्चुकीय** | - उज्जयिनी के राजप्रसाद में अन्तःपुर के अधिकारी ब्राह्मण। |
| **संभषक, भट** | - मगधराज के भृत्य |

### ( स्त्री-पात्र )

| | |
|---|---|
| **वासवदत्ता** | - उदयन की प्रथम पत्नी, उज्जयिनी के राजा प्रद्योत की पुत्री |
| **आवन्तिका** | - छद्मवेश धारण करने वाली वासवदत्ता। |
| **पद्मावती** | - मगधराज दर्शक की बहन, उदयन की द्वितीय पत्नी। |
| **अङ्गारवती** | - प्रद्योत की रानी, वासवदत्ता की माता। |
| **तापसी** | - मगज राज्य के तपोवन में रहने वाली तपस्विनी। |
| **मधुकरिका** | - पद्मावती की सहचरियाँ। |
| **पद्मिनिका** | - पद्मवती की सहचरियाँ। |
| **धात्री** | - पद्मावती की उपमाता। |
| **वसुन्धरा** | - वासवदत्ता की धात्री। |
| **विजया** | - वत्सराज की प्रतिहारी। |

# प्रथमोऽङ्कः

**'स्वप्नवासवदत्तम्' इत्याख्यनाटकस्य प्रथमेऽङ्के-**

परिव्राजकवेषधारी वत्सराज उदयनस्य मन्त्री यौगन्धरायणः आवन्तिकावेषधारिण्या वासवदत्तया सह तपोवनं प्रविशति।

अस्मिन्नेव समये मगधराजस्य कुमारी पद्मावती काञ्चुकीयेन घोषयति-''कस्यार्थः कलशेन.............. यद्यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्।'' वासवदत्तया सह यौगन्धरायणः समागत्य तत्र भवतीं पद्मावतीं निवेदयति-''इयं मे स्वसा प्रोषितभर्तृका। इमामिच्छामि कञ्चिद्कालं परिपाल्यमानामिति। पद्मावती काञ्चुकीयं कथयति-आर्य उद्घोष्यालं विचारेण, यदेष कथयति तथानुष्ठीयताम्। यौगन्धरायण कृतज्ञतां ज्ञापयति। तस्मिन्नेव काले एकः ब्रह्मचारी समागत्य लावाणके ग्रामेऽग्निदाहेन दग्धां वासवदत्तां विज्ञाप्य तत् चिन्तयोदयनस्योद्विग्नतां वर्णयति। अनन्तरं ब्रह्मचारी राज्ञः उदयनस्य दशां विस्तरेण श्रावयित्वा परिव्राजककाञ्चुकीययोराशीर्वादयुतामाज्ञां प्राप्य निर्गतः। यौगन्धरायणोऽपि पद्मावत्याः गमनाज्ञां लब्ध्वा निर्जगाम। काञ्चुकीयः पद्मावत्यावन्तिकाभ्यां सह तापसीम् अभिवाद्य शनैरस्तशिखरे गते भगवति भास्करे सर्वैः सह निष्क्रान्तः।

# द्वितीयोऽङ्कः

द्वितीयाङ्कस्य प्रारम्भे 'प्रवेशके' चेटी आगत्य पद्मावत्याः कन्दुकक्रीडनं सूचयति। तदनन्तरं पद्मावती वासवदत्ता च वार्तालापं कुर्वत्यौ प्रविशतः। धात्री चागत्य मगधराजेन अन्यप्रयोजनेनेहागतस्यामभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव पद्मावत्याः परिणयं स्वीकृतमिति सूचयति। इति ज्ञात्वा सहजा आवन्तिका विषण्णा भवति।

# तृतीयोऽङ्कः

**तृतीयेऽङ्के पद्मावत्या सह उदयनविवाहवृतान्तः**

(आवन्तिका) वासवदत्ता प्रमदवनमात्मानं सान्त्वयितुं प्रविशति। तत्रैवैका चेटी पुष्पाणि गृहीत्वा कौतुकमलिका गुम्फनार्थं आवन्तिकायाः समीपमागच्छति वदति च-''अस्माकं भट्टिनी भणति महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुम्फतु आर्या, अस्मद्भर्तृदारिकायै। वासवदत्तया गुम्फितां कौतुकमालिकामपरा चेटी आगत्य नीत्वा गच्छति। अहो 'अकरुणाः खल्वीश्वरा मे इति विचारयन्ती शयनागारं प्रविशति वासवदत्ता।

# चतुर्थोऽङ्कः

विवाहान्तरं उदयनः सविदूषकः राजगृहमेवावसत्। प्रवेशके विदूषकः विवाहमङ्गलरमणीयकालं वर्णयन् ''क्व खलु महान् दोषः ममाहारः सुष्ठु न परिणर्मा ते, सुप्रच्छदनायां शय्यायां निद्रां न लभे यथा वातशोणिभभित इव वर्तते इति पश्यानि। यः रोगाक्रान्तः प्रातर्भोजनविरहितः स सुखी अपि न सुखी मन्यते (भवति) ततः एका चेटी प्रविशति सा पृच्छति स्नातः जमाता इति स्नातमुदयनं ज्ञात्वा सा सुमनोवर्णकमानयति।

अत्रविदूषकः कथयति सर्वमानयतु भवती वर्जयित्वा भोजनम्। स्वभोजनपदार्थप्रस्थापनप्रतिषेधे हासकारणं प्रगटयति विदूषकः-

''अधन्यस्य मम कोकिलाभक्षिपरिवर्त इव कुक्षि परिवर्तः जातः'' दासी कथयति ईदृश एव भवान् भवतु। विदूषकः कथयति गच्छतु भवती अहमपि-तत्रभवतः उदयनस्य सकासं गच्छामि।

सपरिवारा पद्मावती आवन्तिका च प्रविशति चेटी पृच्छति किमर्थं भवती प्रमदवनमागता

पद्मावती शेफाालिकागुल्मान् द्रष्टुमागतास्मि कुसुमिता गुल्माः न वा। चेटी कुसुमिता ततः पद्मावती कुसुमावचयार्थं निर्दिशति। तावत् पद्मावती वासवदत्ता च शिलापट्टमुपविशतः क्षणान्तरं चेटी शेफालिकाकुसुमपूरिता मेऽञ्जलिः इति कथयन्ती समागता। पुष्पाणां रमणीयतां दृष्टा पुनः अवचिनोतुं निषेधयति पद्मावती, यतो हि कुसुमसमृद्धिं प्रेक्ष्य आर्यपुत्रः (उदयनः) प्रसन्नः भवेत्। ततः वासवदत्ताम् आश्रित्य पद्मावती-आवन्तिकामध्ये वार्तालापं चलति। उदयनस्य अनुरागः मृतायां वासवदत्तायाम् अतिशेते इति पद्मावती भणति।

अस्मिन्मेव समये तत्र विदूषकेन सह राज्ञः उदयनस्य प्रवेशः। तं विलोकय पद्मावती-अवन्तिका लतामण्डप प्रविशतः।

विदूषकः राजानं पृच्छति का तावत् भवते बहुमता पद्मावती वासवदत्ता वा। राजा वदति-

किमिदार्नीं भवान् महति बहुमान संकटे मां व्यवस्यति

एका उपरता अपरा असन्निहिता इत्युक्तं विदूषकेन। राजाब्रूते न खलु ब्रूयाम। प्रसीदतु प्रसीदतु भवान् वयस्यभावेन शापितोऽसि यदि सत्यं न वदसि-

राजा का गतिः श्रूयताम्-

**पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।**
**वासवदत्ताबद्धं नतु तावन्मे मनो हरति॥**

वासवदत्ता मनसि विचारयति-एतावद् दुःखस्य वेतनं प्राप्तम्। अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते। पद्मावती विचारयति अहो सदाक्षिण्यमार्यपुत्रस्य य इदानीमपि वासवदत्तायाः गुणान् स्मरति राजा विदूषकं पृच्छति मया तु उक्तम् भवान् वदतु का भवतः प्रिया। विदूषकः-किं विलपितेन उभे अपि तत्रभवत्यौ मे बहुमते। पुनः राजा विदूषकं वदति मामेवं बलाच्छ्रुत्वा किमिदार्नीं नाभिभाषसे? विदूषक शृणोतु भवान् इदानीम् तत्रभवती वासवदत्ता मे बहुमता तत्र भवती पद्मावती तरुणी दर्शनीया, अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या।

अयं चापरो वासवदत्तायाः महान् गुणः स्निग्धेन भोजनेन मां प्रत्युद्गच्छति-किन्नुखलु गतः आर्यवसन्तकः।

अस्मिन् परिहासावसरे उदयनस्यनेत्रे साश्रूणि संवृत्ते। विदूषकः मुखप्रक्षणनार्थं जलमानयति। तदैवावसरे आवन्तिकालतामण्डपात् निस्सृता। विदूषकः जलमानयति। पद्मावती अपि आगच्छति। सन्देशः आयाति।

अपराह्णकाले सुहृज्जनमेलापकं सुनिश्चितम् तत्रभवता मगधराजेन। सत्कारो सतत्कारेणप्रतीष्ठः प्रीतिमुत्पादयति तद् भवानुत्तिष्ठतु।

**गुणानां विशालानां सत्काराणां च नित्यशः।**
**कर्तारः सुलभः लोके विज्ञातारस्तु दुर्लभाः॥**

इति कथनेन समाप्तः चतुर्थोऽङ्कः

## पञ्चमोऽङ्कः

पञ्चमेऽङ्के प्रवेशके पद्मनिका मधुरिका च आगच्छतः तयोः वार्तालापेन ज्ञायते यत् पद्मावती शिरोवेदनया दुःखितास्ति। तस्या शय्या समुद्रगृहके स्तीर्णा अस्ति पद्मनिका मधुरिकां आवन्तिकायाः आह्वानाय कथयति। येन सा पद्मावत्या शिरोवेदनां मधुराभिः कथाभिः दूरी करिष्यति, मधुरिका तावत् आवन्तिकाम् अन्विष्यति पद्मनिका तु विदूषकम् आर्यं वसन्तकम्। विदूषकं प्राप्य सा तत्रभवत्याः पद्मावत्याः शिरोवेदनां निवेदयति उदयनेन सह तं पद्मावत्या पार्श्वे गमनाय निवेद्य सा तावद् शिरोवेदनोपचरार्थलेपनार्थं त्वरयति। विदूषकः राजानमुदयनं निवेदयितुं प्रस्थितः।

तदनन्तरं मञ्चे उदययनस्य प्रवेशः। चिन्तामग्नं राजनं विदूषकः कथयति त्वरतां, त्वरतां तावद्भवान्, यतो हि तत्रभवती पद्मावती शिरोवेदनया दुःखितेति। एतच्छ्रुत्वा उदयनः समुद्रगृहकं प्रविशति।

तत्र च पद्मावतीं न दृष्ट्वा तत्रैव प्रतीक्षारतोऽभवत्। विदूषकः राजा कथां श्रावयति तदैव राजा उदयनः स्वपिति, विदूषकश्च बहिर्गच्छति। तदैवावन्तिका पद्मावती द्रष्टुं समागच्छति। आवन्तिका सुप्तमुदयनं पद्मावतीं मन्यमाना तस्यामेव शय्यायां स्वयमपि स्वपिति। स्वप्ने उदयनः वासवदत्तां प्रलपति। तदा किन्तु दृष्टास्मि उदयनेनेति विचिन्त्य भीता वासवदत्ता शयनाद् तस्मादुत्थाय गन्तुं तत्पराऽभवत् तदैव राज्ञा पुनः स्वप्नायितं तद् ज्ञात्वा आश्वस्ता वासवदत्ता प्रलम्बितं शय्यातः आर्यपुत्रस्य हस्तं यदा शय्यायामारोप्य गन्तुमिच्छति तदैव तस्य निद्राभङ्गो जातः तदा शय्यातः सहसा उत्थाय राजा निष्क्रमतीं वासवदत्तां पश्यति कथयति च तिष्ठ-तिष्ठ। अथ च "धावन् द्वारिपक्षेण ताडितः। तदैव विदूषकः आगच्छति कथयति च सा वासवदत्ता चिरात् मृता स्वप्ने भवता दृष्टा। तदा काञ्चुकीयः प्रविश्य कथयति अस्माकं महाराजो दर्शको भवन्तमाह खलु भवतोऽमात्यो बलसमुदायेनोपनीतः आरुणिमुपघातयितुम्।

राजा उदयनः उत्थाय कथयति-

**"उपेन्द्र नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्म दक्षम्।**
**विकीर्णवाणोग्रतरङ्गभङ्गे महार्णवाभे युधिनाशयामि॥"**

## षष्ठोऽङ्क

**षष्ठेऽङ्के राजा उदयनः शत्रुमारुणिं पराजित्य स्वकीयं राज्यं पुनराप्नोति।**

ततः उज्जयिनीतः उदयनस्य वासवदत्तायाश्च विवाहचित्रेण सह वासवदत्ताया धात्री वसुन्धरा कञ्चुकी च महासेनस्य वासवदत्ताया मातुश्च सन्देशेन सह समुपस्थितौ-चित्रं दृष्टा पद्मावत्या कथितम् यथैषा प्रतिकृति तथा इहैव आवन्तिका नाम्ना प्रतिवसति तदा राज्ञाज्ञया आवन्तिकावेषधारिणी वासवदत्ताहूता। अस्मिन्नेव काले संन्यासीवेषधारी यौगन्धरायणः स्वकीयां भगिनीं नेतुमागतः प्रतिहारी आगत्य कथयति-"जयतु भर्ताः एष उज्जयीनो ब्राह्मणः भटिन्याः हस्ते मम भगिनेति कथयित्वा न्यासो निक्षिप्तः तं प्रतिग्रहीतुं प्रतिहारमुपस्थितः।"

राजा कथयति किन्नु स ब्राह्मण? भवितव्यमिति पद्मनिकया कथितम् राजा तं ब्राह्मणम् समुदाचारेण शीघ्रप्रवेशायादिशति। राजा पद्मावती कथयति त्वमपि तां (अवन्तिकां) (न्यासं) आनय इति "ततः यौगन्धरायणः प्रतिहारी च प्रविशति। ब्राह्मणः वदति जयतु जयतु भवान्। राजा कथयति श्रुतपूर्वोऽयं स्वरः। अस्तु तावदस्य भगिनी दीयताम् आवन्तिकां दृष्ट्वा धात्री कथयति अम्भो! भर्तृदारिका वासवदत्तैषा। राजा कथयति कथं महासेनपुत्री? देवि प्रविश पद्मावत्या सह।

यौगन्धरायणः कथयति-

**भारतानां कुले जातो विनीतो ज्ञानवान् शुचिः।**
**तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः॥**

राजा कथयति संक्षिप्यताम् जवनिका रूपसादृश्यमवलोकयामि तदनन्तरं वासवदत्ता कथयतिजयत्वार्यपुत्रः? यौगन्धरायणः कथयति जयतु स्वामी।असौ यौगन्धरायणः, इयं महासेन पुत्री, किन्नु सत्यमिदं स्वप्नो वा सा दृश्यते मया?

राजा उत्थाय कथयति-

**मिथ्योन्मादैश्चयुद्धैश्य शास्त्रदृष्टैश्च मन्त्रितैः।**
**भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः॥**

राजा सोदयनः सपरिवारं राज्ञः प्रद्योतस्य दर्शनाय प्रस्थितः ततः भरतवाक्येन-

**इमां सागरपर्यन्ता हिमवाद्बद्धकुण्डलां महीमेकातपत्राङ्कां राजसिंहःप्रशास्तु नः।**

❖ ❖ ★ ❖ ❖

॥श्री॥

**महाकविश्रीभासप्रणीतं**

**स्वप्नवासवदत्तम्**

# प्रथमोऽङ्कः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

**सूत्रधारः—**

**उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।**
**पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्॥1॥**

**अन्वयः** — उदयनवेन्दुसवर्णौ आसवदत्ताबलौ पद्मावतीर्णपूर्णौ वसन्तकम्रौ बलस्य भुजौ त्वां पातामित्यन्वयः॥1॥

**एवमार्यमिश्रान् विज्ञापयामि। अये! किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते? अङ्ग! पश्यामि।**

**(नेपथ्ये )**

उस्सरह उस्सरह अय्या! उस्सरह। [उत्सरतोत्सरतार्याः! उत्सरत।]

**सूत्रधारः — भवतु, विज्ञातम्।**

**भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।**
**धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः॥2॥**

**अन्वयः** —स्निग्धैः कन्याऽनुगामिभिः मगधराजस्य भृत्यैः तपोवनगतः सर्वो जनो धृष्टम् उत्सार्यते। इत्यन्वयः।

**(निष्क्रान्तः)**

**स्थापना**

**(प्रविश्य।)**

**भटौ— उस्सरह उस्सरह अय्या! उस्सरह। [ उत्सरतोत्सरतार्याः! उत्सरत। ]** (ततः प्रविशति परिव्राजकवेशो यौगन्धरायण आवन्तिकावेषधारिणी वासवदत्ता च)

**यौगन्धरायणः**—(कर्ण दत्त्वा) **कथमिहाप्युत्सार्यते? कुतः-**

**धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-**
**र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।**
**उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः**
**कोऽयं भो! निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया॥3॥**

**अन्वयः**—धीरस्य आश्रमसंश्रितस्य वसतः वन्यैः फलैः तुष्टस्य मानाऽर्हस्य वल्कलवतो जनस्य त्रासः समुत्पाद्यते। भोः! उत्सिक्तो विनयात् अपेतपुरुषः चलैः भाग्यैर्विस्मितः अयं कः निभृतम् इदं तपोवनम् आज्ञया ग्रामीकरोति॥3॥

**वासवदत्ता—अय्य! को एसो उस्सारेदि?** [आर्य! क एष उत्सारयति?]

**यौगन्धरायणः—भवति! यो धर्मादात्मानमुत्सारयति।**

**वासवदत्ता—अय्य! ण हि एव्वं वत्तुकामा, अहं वि णाम उत्सारइदव्वा होमित्ति।** [आर्य! नह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति।]

**यौगन्धरायणः—भवति! एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते।**

**वासवदत्ता—अय्य! तह परिस्समो परिखेदं ण उप्पादेदि जह अअं परिभवो।** [आर्य! तथा परिश्रमः परिखेदं नोत्पादयति, यथायं परिभवः]।

**यौगन्धरायणः—'भुक्तौज्झित' एव विषयोऽत्रभवत्या, नात्र चिन्ता कार्या। कुतः—**

**पूर्वं त्वयाप्यभिमतं गतमेवमासी-**
**च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।**
**कालक्रमेण जगतः परिवर्तमाना**
**चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥4॥**

**अन्वयः**—पूर्वं त्वया अपि एवम् गतम् अभिमतम् आसीत्। पुनः भर्तुः विजयेन श्लाघ्यं गमिष्यसि। कालक्रमेण परिवर्तमाना जगतो भाग्यपङ्क्तिः चक्रारपङ्क्तिः इव गच्छति॥4॥

**भटौ—उस्सरह अय्या! उस्सरह।** [उत्सरतार्याः। उत्सरत।]

(ततः प्रविशति काञ्चुकीयः।]

**काञ्चुकीयः-सम्भषक! न खलु न खलूत्सारणा कार्या। पश्य-**

**परिहरतु भवान् नृपापवादं, न परुषमाश्रमवासिषु प्रयोज्यम्।**
**नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति॥5॥**

**अन्वयः**—भवान् नृपाऽपवादं परिहरतु, आश्रमवासिपु परुषं न प्रयोज्यम्। मनस्विन एते नगरपरिभवान् विमोक्तुं वनम् अभिगम्य वसन्ति॥5॥

**उभौ—अय्य! तह।** [आर्य! तथा।]

(निष्क्रान्तौ।]

**यौगन्धरायणः—हन्त! सविज्ञानमस्य दर्शनम्। वत्से! उपसर्पावस्तावदेनम्।**

**वासवदत्ता—अय्य! तह।** [आर्य! तथा।]

**यौगन्धरायणः**—(उपसृत्य) **भोः ! किङ्कृतेयमुत्सारणा?**

**काञ्चुकीयः**—**भोस्तपस्विन्!**

**यौगन्धरायणः**—(आत्मगतम्) **तपस्विन्निति गुणवान् खल्वयमालापः अपरिचयात्तु न श्लिष्यते मे मनसि।**

**काञ्चुकीयः**—**भोः! श्रूयताम्। एषा खलु गुरुभिरभिहितनामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम सैषा नो महाराजमातरं महादेवीमाश्रम-स्थामभिगम्यानुज्ञाता तत्रभवत्या राजगृहमेव यास्यति। तदद्यास्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः। तद् भवन्तः-**

**तीर्थोदकानि समिधः कुसुमानि दर्भान्**
**स्वैरं वनादुपनयन्तु तपोधनानि।**
**धर्मप्रिया नृपसुता न हि धर्मपीडा-**
**मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः॥6॥**

**अन्वयः**—तीर्थोदकानि समिधः कुसुमानि दर्भान् तपोधनानि वनात् स्वैरम् उपनयन्तु। हि धर्मप्रिया नृपसुता तपस्विषु धर्मपीडां न इच्छेत् एतत् अस्याः कुलव्रतम्॥6॥

**यौगन्धरायणः**—(स्वगतम्) **एवम्! एषा सा मगधराजपुत्री पद्मावती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति। ततः-**

**प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।**
**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥7॥**

**अन्वयः**—प्रद्वेषो बहुमानो वा सङ्कल्पात् उपजायते। भर्तृदाराऽभिलाषित्वात् मे अस्यां मती स्वता॥7॥

**वासवदत्ता**—(स्वगतम्) **राअदारिअत्ति सुणिअ भइणिआसिणेहो वि मे एत्थ सम्पज्जइ।** [राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र सम्पद्यते]

(ततः प्रविशति पद्मावती सपरिवारा चेटी च।)

**चेटी**—**एदु एदु भट्टिदारिआ इदं अस्समपदं पविसदु।** [एत्वेतु भर्तृदारिका इदमाश्रमपदं प्रविशतु।]

(ततः प्रविशत्युपष्टिा तापसी।)

**तापसी**—**साअदं राअदारिआए।** [स्वागतं राजदारिकायाः।]

**वासवदत्ता**—(स्वगतम्) **इअं सा राअदारिआ। अभिजणाणुरूव खु से रूवं।** [इयं सा राजदारिका। अभिजनानुरूपं खल्वस्या रूपम्।]

**पद्मावती**—**अय्ये! वन्दामि।** [आर्ये! वन्दे।]

**तापसी**—**चिरं जीव। पविस जादे! तवोवणाणि णाम अदिहिजणस्य सअगेहं।** [चिरं जीव। प्रविश जाते! प्रविश। तपोवनानि नामाऽतिथि-जनस्य स्वकगेहम्।]

**पद्मावती**—**भोदु भोदु। अय्ये! विस्सत्थह्मि। इमिणा बहुमाणवअणेण अणुग्गहिदह्मि।** [भवतु भवतु। आर्ये! विश्वस्ताऽस्मि। अनेन बहुमानवचनेनानुगृहीताऽस्मि।]

**वासवदत्ता**— (स्वगतम्) **ण हि रूवं एव्व, वाआ वि खु से महुरा।** [न हि रूपमेव, वागपि खल्वस्या मधुरा।]

**तापसी**—**भद्दे! इमं दाव भद्दमुहस्स भइणिअं कोवि राआ ण वरेदि?** [भद्रे! इमां तावद् भद्रमुखस्य भगिनिकां कश्चित् राजा न वरयति?]

**चेटी—अस्थि राआ पज्जोदो णाम उज्जणीए। सो दारअस कारणादो दूदसम्पादं करेदि।** [अस्ति राजा प्रद्योतो नामोज्जयिन्याः। स दारकस्य कारणाद् दूतसम्पातं करोति।]

**वासवदत्ता—**(आत्मगतम्) **भोदु भोदु। एदा अ अत्तणीआ दाणिं संवुत्ता।** [भवतु भवतु। एषा चात्मीयेदानीं संवृत्ता।]

**तापसी—अर्हा खु इअं आइदी इमस्स बहुमाणस्य। उभआणि राअउलाणि प्रहत्तराणि त्ति सुणीअदि।** [अर्हा खल्वियमाकृतिरस्य बहुमानस्य। उभे-राजकुले महत्तरे इति श्रूयते।]

**पद्मावती—अय्य! किं दिट्ठो मुणिजणो अत्ताणं अणुग्गहीदुं? अभिप्पेदप्पदाणे नतवस्सिजणो उवणिमन्तीअदु दाव को किं एत्थ इच्छदित्ति।** [आर्य! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम्? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति?]

**काञ्चुकीयः—यदभिप्रेतं भवत्या। भो भोः आश्रमवासिनस्तपस्विनः। शृण्वन्तु शृण्वन्तु भवन्तः, इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादितविस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते।**

**कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं**
**दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।**
**आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया**
**यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥4॥**

**अन्वयः—**कस्य कलशेन अर्थः? को यथानिश्चितं वासो मृगयते? दीक्षां पारितवान् (कः) पुनः गुरोः यत् देयं भवेत् किम् इच्छति? इह धर्माऽभिरामप्रिया नृपजा आत्माऽनुग्रहम् इच्छति। यस्य यत् समीप्सितम् अस्ति तद् वदतु। अद्य कस्य किं दीयताम्? ॥4॥

## श्लोकार्थः

1.1 **संस्कृत-व्याख्या-** ग्रन्थस्य निर्विघ्नसमाप्तिकामः महाकविः भासः मंगलाचरणे बलरामस्य स्तुतिं करोति-उदयकालिकं चन्द्रसदृशकान्तिवन्तौ, मद्यपानेन शक्तिसम्पन्नौ-शास्त्रोक्त-श्रीवत्सादिशुभलक्षणसमन्वितौ, वसन्तुर्तुः इव कमनीयौ बलरामस्य भुजौ भवतः रक्षताम्।

1.2 **संस्कृत-व्याख्या-** सूत्रधारः कोलाहलस्य कारणं ज्ञात्वा कथयति-एते मगधराजस्य सेवकाः, तस्याः भगिन्याः पद्मावत्याः ये संरक्षणे नियुक्ताः, स्नेहपूर्णाः विश्वासपात्राणि च ते वनवासिनां बालवृद्धादीनां तपस्वीनां धृष्टतापूर्वकं मार्गात् दूरीकरणं कुर्वन्ति।

1.3 **संस्कृत-व्याख्या-** तपोधनानां समुत्सारणां दृष्ट्वा तत्सर्वं अनुचितं मन्यमानः संन्यासीवेषधारी यौगन्धरायणः कथति-धैर्यशालिनः, तपोवनं आगत्य निवासं कुर्वतः, वने उत्पन्ननि कन्दमूलफलादीनि तैः एव सन्तुष्टस्य, पादपानां त्वक् वल्कलवस्त्ररूपेण धारिणः, सम्मानार्हस्य तपस्विनां समूहस्य अत्र तपोवने अपि चञ्चलस्वभावैः धन-ऐश्वर्यादिविभवैः अहंकारसम्पन्नः कः अविनीतः समुत्सारणास्वरूपं भयं उत्पन्नं करोति। एवं तपस्विजनानां शान्तं अपि आश्रमपदं ग्रामवत् अशान्तियुक्तं करोति, क्षुब्धतां प्रापयति, इत्यर्थः।

1.4 **संस्कृत-व्याख्या-** उत्सारणारूप-परिभवेन चिन्तितां वासवदत्तां अवलोक्य यौगन्धरायणः कथयति-पूर्वङ्काले महाराजोदयनस्य अभ्युदयसमये भवती अपि श्लाघापूर्वकम् एवमेव प्रस्थानं करोति स्म, पुनश्च स्वपत्युः राज्यप्राप्ते सति विजयेन एवमेव प्रस्थानं करोति स्म, पुनश्च राज्यप्राप्ते सति विजयेन

कमेव पुन: प्रशंसनीयरूपमेव यास्यति। कुत: जगत: भाग्यदशा चक्रदण्ड पंक्ति: इव परिवर्तमाना भवति। एकस्मिन् समये उपरि गच्छति, अग्रिमे क्षणे नीचै: गच्छति। एवमेव संसारेऽस्मिन् प्राणीनां जीवने एकदा सुखं भवति, अन्यस्मिन् समये दु:खं भवति। सर्वदा न सुखं भवति न वा दु:खं एव भवति। अत: अस्मिन् विषये चिन्ता न करणीया।

1.5 **संस्कृत-व्याख्या**- सम्भषकनामकं राजपुरुषं सम्बोधयन् काञ्चुकीय: कथयति-हे सम्भषक! स्व: स्वामिन: महाराज-उदयनस्य निन्दां दूरीकुरु। तपोवनवासिन: प्रति कठोरतापूर्वकं वाचं मा वद। तेषां अपमानं मा कुरु। एते तपस्विन: स्वाभिमानिन: सन्ति। अत: नगरे सम्भावितं तिरस्कारं अपमानं न कार्य:। एतेषां अपमानेन युष्माकं स्वामिन: नृपस्य एव निन्दा भविष्यति। अत: एवं मा कुरु।

1.6 **संस्कृत-व्याख्या**- काञ्चुकीय: तपस्विकुलं स्वेच्छापूर्वकं धर्माचरणाय प्रेरयति। हे तपस्विन:! भवन्त: पवित्रजलानि, पुष्पाणि, होमकाष्ठानि, कुश-तृणानि तपोसाधनानि द्रव्याणि वनात् स्वेच्छया आनयन्तु। भवतां सर्वेषां धर्मक्रिया: निर्विघ्ना: भवेयु:, कुत: राजपुत्री पद्मावती धर्मं प्रति अनुरागं धारयति। अत: धर्मचारणविषये एषा विघ्नं लेशमात्रं अपि न वाञ्छति। अनया व्रतं एतत् कुलपरम्परया प्राप्तं वर्तते।

1.7 **संस्कृत-व्याख्या**- एषा नृपसुता 'पद्मावती' इति काञ्चुकीयमुखेन ज्ञात्वा यौगन्धरायण: तां प्रति महतीं आत्मीयतां अनुभवति कथयति च, कस्य अपि जनस्य मनसि कं अपि जनं प्रति प्रद्वेष: स्वता वा तस्य मन: संकल्पात् एवं जायते। यस्य चित्ते यादृशी भावना प्रादुर्भवति, तद्नुसारेण एव स: तस्य आदरं करोति विद्वेषं वा करोति। अनेनैव कारणेन 'उत्सारणाया: आज्ञा प्रदात्री एषा' इति विचिन्त्य मम मनसि एषां प्रति विद्वेष: प्रादुर्भूत: पूर्वकाले आसीत्, किन्तु इदानीम् 'इयं मम स्वामिन: उदयनस्यदारा भविता' इति ज्ञात्वा तस्मिन् एव मम चित्ते एषां प्रति आत्मीयता उत्पन्ना

1.8 **संस्कृत-व्याख्या**- राजदारिकाया: पद्मावत्या: निर्देशानुसारं काञ्चुकीय: आश्रमवासिनां समक्षे इयं घोषणा करोति यत्- अस्मिन् आश्रमे यदि कोऽपि तापस: ब्रह्मचारी वा कमण्डलुं वाञ्छति, किं वा वल्कलवस्त्रं अभिलषति अथवा गुरुभ्य: विविधत् शिक्षां गृहीत्वा दीक्षानन्तरं स्व संकल्पानुसारं गुरुदक्षिणायै किमपि दातुं इच्छति? तत् सर्वं अत्र नृपसुताया: समक्षे उपस्थितो भूत्वा कथयतु। नृपसुता तत् सर्वं दातुं वाञ्छति। विषयेऽस्मिन् नृपदारिकाया: लेशमात्रमपि स्वार्थ: न अवलोकनीय:, एषा तस्या: तपस्विन: प्रति, आश्रमवासिन: प्रति श्रद्धाभावना वर्तते। यदि अत्रभवन्त: अत्रागत्य स्व-स्वावश्यकतां कथयिष्यन्ति, तानि तानि वस्तूनि च ग्रहीष्यन्ति, अनेन राजसुता एषा कृतार्थां भविष्यति।

## अभ्यास:

**प्रश्न-1. एकपदेन संस्कृतभाषया उत्तरत-**

i) नान्द्यन्ते क: प्रविशति?

ii) स्वप्नवासवदत्तस्य नाटकस्य रचयिता क:?

iii) सूत्रधार: आगत्य कस्य देवस्य वन्दनां करोति?

iv) पद्मावत्या भ्राता क:?

v) 'कथमिहाप्युत्सार्यते' कस्य वचनम्?

vi) 'तथा परिश्रम: खेदम् नोत्पादयति यथायं परिभव:' कस्या कथनम्?

vii) 'भुक्तोज्झित एव विषयोऽत्रभवत्या:' केन कथितम्?

viii) आवन्तिकायाः अपरं नाम किम्?

ix) ''तीर्थोदकानि समिधः......। इति कः वदति?

x) 'चक्रारपङ्क्तिरिव गच्छति भाग्यपंक्तिः' कस्य कथनम्?

xi) आश्रमवासिषु कथं भूतं वचनं न प्रयोज्यम्?

**प्रश्न-2. एक वाक्येन उत्तरत-**

i) वनमभिगम्य के वसन्ति?

ii) तपोधनानि कानि?

iii) महाराजमातरं महादेवीं का अभिगच्छति?

iv) वनवासिषु किं न प्रयोज्यम्?

v) भाग्यपंक्तिः कथमिव गच्छति?

vi) कन्यानुगामिभिः मगधराजस्य भृत्यैः क उत्सार्यते?

**प्रश्न-3. कोष्टकात् शुद्धं पदम् विचित्य वाक्यानि पूरयत-**

i) ततः प्रविशति अवन्तिकावेषधारी .................. (पद्मावती/चेटी/वासवदत्ता)

ii) एवमनिर्ज्ञातानि ................. अवधूयन्ते। (मानवाः/दुष्टाः/दैवतानि)

iii) एषा सा मगधराजपुत्री ..................। (वासवदत्ता/पद्मावती/रदनिका)

iv) प्रद्वेषो बहुमानो वा ................. उपजायते। (संकल्पाद्/अज्ञानात्/चिन्तया)

v) अस्ति राजा .................. नाम उज्जैयिन्याः। (उदयनः/प्रद्योतः/प्रसेनजित)

**प्रश्न-4. अद्योलिखितानां पदानां प्रकृतिप्रत्ययौ पृथक् पृथक् लिखत-**

| पदम् | प्रकृति (मूलशब्दः) | प्रत्ययः |
|---|---|---|
| प्रसिद्धा | ........................ | ............... |
| अस्याः | ........................ | ............... |
| कारणात् | ........................ | ............... |
| कुले | ........................ | ............... |
| तपस्विनी | ........................ | ............... |
| महती | ........................ | ............... |
| भविष्यति | ........................ | ............... |
| तपस्विषु | ........................ | ............... |
| परिहरतु | ........................ | ............... |
| कञ्चुकीयः | ........................ | ............... |
| उत्सारयति | ........................ | ............... |
| पूज्ये | ........................ | ............... |

**प्रश्न-5. 'क' स्तम्भे विशेषणपदानि 'ख' स्तम्भे विशेष्यपदानि लिखितानि, तेषामुचितमेलनं कुरुत-**

| ''क'' | ''ख'' |
|---|---|
| धीरा | सिद्धवाक्यानि |
| सुपरीक्षितानि | कन्या |
| महता | भगिनी |
| सानुक्रोशा | यत्नेन |

**प्रश्न-6. अधोलिखित-उदाहरणानुसारं समस्तपदानि समासनाम च लिखत-**

| विग्रहाः | समस्तपदानि | समासनाम |
|---|---|---|
| समानो वर्णो ययो: | समानवर्णौ | बहुव्रीहि |
| उदयनवेन्दुना सवर्णतौ: | उदयनवेन्दुसवर्णौ | तत्पुरुष: |
| आर्याश्च ते मिश्रा | .................. | .................. |
| तपस: वनम् | .................. | .................. |
| अपेत:पुरुषा: यस्य स | .................. | .................. |
| नगरेपरिभवा: | .................. | .................. |
| तीर्थस्य उदकानि | .................. | .................. |
| धर्म: प्रियो यस्या: सा | .................. | .................. |
| तपस: धनानि | .................. | .................. |
| भर्तु: दारा: | .................. | .................. |
| बहुमानं च तद् वचनम् | .................. | .................. |
| दूतस्य सम्पात: तम् | .................. | .................. |

**प्रश्न-7. रेखाङ्कितकर्तृपदे तृतीयाविभक्तिं प्रयुज्य कर्मवाच्ये वाक्यानि लिखत-**

i) क: किमत्रेच्छति।

ii) भवन्तु: शृण्वन्तु।

iii) अहं किं ददानि

iv) को यथानिश्चितं वासो मृगयते।

v) राजदारिका भवति।

vi) प्रविशति पद्मावती सपरिवारा।

**प्रश्न-8. अधोलिखितानां शब्दानां समानार्थकानि पदानि लिखत-**

आर्य:, दैवतानि, हन्त, स्वामी, समिध:

## योग्यता-विस्तारः

**उपजीव्य-कथानक-दृष्ट्या भासनाटकानां चत्वारो विभागाः सन्ति-**

| | | | |
|---|---|---|---|
| 1. | रामायण-मूलकानि | - | प्रतिमानाटकम्, अभिषेक नाटकञ्च |
| 2. | कृष्णकथा-मूलकानि | - | बालचरितम् |
| 3. | महाभारत-मूलाकनि | - | उरुभङ्गम्, दूतघटोत्कचम्, दूतवाक्यम्, कर्णभारम्, मध्यमव्यायोगः पञ्चरात्रम् |
| 4. | बृहत्कथामूलकानि | - | प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम्, अविमारकम्, चारुदत्तम् |

❖ ❖ ★ ❖ ❖

## प्रथमेऽङ्के द्वितीयः उपक्रमः

पूर्वपीठिका-

एतत् पूर्वं काञ्चुकीयः पद्मावत्याः कथनानुसारं आश्रमवसिनः मनोवाञ्छानुसारं दानाय उद्घोषयति- "कस्यार्थः कलशेन .................. किं दीयताम् इति।

एतच्छ्रुत्वैव यौगन्धरायणः विचार्य प्रकाशयति अहमर्थीति।

**यौगन्धरायणः**-हन्त! दृष्ट उपायः। (प्रकाशम्) भोः! **अहमर्थी।**

**पद्मावती**-**दिट्ठिआ सहलं में तवोवणाभिगमणं।** [दिष्ट्या सफलं मे तपोवनाभिगमनम्।]

**तापसी**-**संतुट्ठतवस्सिजणं इदं अस्समपदं। आअन्तुएण इमिणा होदव्वं।** [सन्तुष्टतपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्।]

**काञ्चुकीयः**-**भोः किं क्रियताम्?**

**यौगन्धरायणः**-**इयं मे स्वसा। प्रोषितभर्तृकामिमामिच्छाम्यत्रभवत्या कञ्चित् कालं परिपाल्यमानाम्। कुतः**-

**कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रैर्नाहं काषायं वृत्तिहेतोः प्रपन्नः।**

**धीरा कन्येयं दृष्टधर्मप्रचारा शक्ता चारित्रं रक्षितुं मे भगिन्याः॥9॥**

**अन्वयः**-अर्थैः न एव, भोगैः अपि न; वस्त्रैः (अपि) न कार्यम्। अहं वृत्तिहेतोः काषायं प्रपन्नो न। धीरा दृष्टधर्मप्रचारा इयं कन्या मे भगिन्याः चारित्रं रक्षितुं शक्ता।

**वासवदत्ता**-(आत्मगतम्) **हं, इह मं णिक्खिविदुकामो अय्योगन्धरायणो? होदु, अविआरिअ कमं ण करिस्सदि।** [हम्, इह मां निक्षेप्तुकाम आर्ययौगन्धरायणः? भवतु, अविचार्य क्रमं न करिष्यति।]

**काञ्चुकीयः**-**भवति! महती खल्वस्य व्यपाश्रयणा। कथं प्रतिजानीमः? कुतः**-

**सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।**

**सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥10॥**

**अन्वयः**-अर्थः सुखं दातुं भवेत्, प्राणाः सुखं दातुं (भवेयुः), तपः सुखं दातुं भवेत्। अन्यत् सर्वं सुखं दातुं भवेत्, (परम्) न्यासस्य रक्षणं दुःखं भवेत्॥10॥

**पद्मावती**-**अय्य! पढमं उग्घोसिअ को किं इच्छदित्ति अजुत्तं दाणि विआरिदुं। जं एसो भणादि, तं अणुचिट्ठदु अय्यो।** [आर्य! प्रथममुद्घोष्य कः किमिच्छतीत्ययुक्तमिदानीं विचारयितुम्। यदेष भणति, तदनुतिष्ठत्वार्यः।]

**काञ्चुकीयः**-**अनुरूपमेतद् भवत्याभिहितम्।**

**चेटी**-**चिरं जीवदु भट्टिदारिआ एवं सच्चवादिणी।** [चिरं जीवतु भर्तृदारिकैवं सत्यवादिनी।]

**तापसी**-**चिरं जीवदु भद्दे!** [चिरं जीवतु भद्रे!]

**काञ्चुकीयः**-**भवति! तथा।** (उपगम्य) **भो! अभ्युपगतमत्रभवतो भगिन्याः परिपालनमत्रभवत्या।**

**यौगन्धरायणः**-**अनुनृहीतोऽस्मि तत्रभवत्या। वत्से! उपसर्पात्रभवतीम्।**

**वासवदत्ता**-(आत्मगतम्) **का गई। एसा गच्छामि मन्दभाआ।** [का गतिः। एषा गच्छामि मन्दभागा।]

**पद्मावती**-**भोदु भोदु। अत्तणीआ दाणिं संवुत्ता।** [भवतु भवतु। आत्मीयेदीनीं संवृत्ता।]

**तापसी**-**जा ईदिसी ते आइदी, इयं वि राअदारिअत्ति तक्केमि।** [या ईदृश्यस्या आकृतिः इयमपि राजदारिकेति तर्कयामि।]

**चेटी**-**सुट्ठु अय्या भणादि। अहं वि अणुहूदसुहत्ति पेक्खामि।** [सुष्ठु आर्या भणति। अहमप्यनुभूतसुखेति प्रेक्षे।]

**यौगन्धरायणः**-(आत्मगतम्) **हन्त भोः! अर्धमवसितं भारस्य। यथा मन्त्रिभिः सह समर्थितं, तथा परिणमति। ततः प्रतिष्ठिते स्वामिनि तत्रभवतीमुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति। कुतः**-

**पद्मावती नरपतेर्महिषी भवित्री**
**दृष्टा विपत्तिरथ यैः प्रथमं प्रदिष्टा।**
**तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्या-**
**न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि॥11॥**

**अन्वयः**-यैः प्रथमं विपत्तिः प्रदृष्टा अथ पद्मावती नरपतेः महिषी भवित्री (इति) प्रदिष्टा। तत्प्रत्ययात् इदं कृतम्। हि विधिः सुपरीक्षितानि सिद्धवाक्यानि व्युत्क्रम्य न गच्छति॥11॥

(ततः प्रविशति ब्रह्मचारी)

**ब्रह्मचारी**-(उर्ध्वमवलोक्य) **स्थितो मध्याह्नः। दृढमस्मि परिश्रान्तः। अथ कस्मिन् प्रदेशे विश्रमयिष्ये?** (परिक्रम्य) भवतु, दृष्टम्। अभितस्तपोवनेन भवितव्यम्। तथाहि-

**विस्त्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया**
**वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।**
**भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो**
**निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः॥12॥**

**अन्वयः**-देशागतप्रत्यया अचकिता हरिणा विश्रब्धं चरन्ति। सर्वे वृक्षाः पुष्पफलैः समृद्धविटपा दयारक्षिताः। कपिलानि गोकुलधनानि भूयिष्ठम् (सन्ति)। दिशः अक्षेत्रवत्यः। हि धूमो बह्वाश्रयः। इदं निःसन्दिग्धं तपोवनम्॥12॥

**ब्रह्मचारी**-**यावत् प्रविशामि।** (प्रविश्य) अये! **आश्रमविरुद्धः खल्वेष जनः।** (अन्यतो विलोक्य) **अथवा तपस्विजनोऽप्यत्र निर्दोषमुपसर्पणम्। अये! स्त्रीजनः।**

**काञ्चुकीयः**-**स्वैरं स्वैरं प्रविशतु भवान्। सर्वजनसाधारणमाश्रमपदं नाम।**

**वासवदत्ता**-**हं।**

**पद्मावती**-**अम्भो! परपुरुषसंदंसणं परिहरदि अय्या। भोदु, सुपरिवालणीओ खु मण्णासो।** [अम्मो! परपुरुषदर्शनं परिहरत्यार्या। भवतु, सुपरिपालनीयः खलु मन्न्यासः।]

**काञ्चुकीयः**-**भोः पूर्वं प्रविष्टाः स्मः। प्रतिगृह्यतामतिथिसत्कारः।**

**ब्रह्मचारी**-(आचम्य) **भवतु भवतु। निवृत्तपरिश्रमोऽस्मि।**

**यौगन्धरायणः**-**भोः! कुत आगम्यते, क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य?**

**ब्रह्मचारी-भोः! श्रूयताम्! राजगृहतोऽस्मि! श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि।**

**वासवदत्ता** (आत्मगतम्) **हा! लावाणअं णाम। लावाणअसङ्कित्तणेण पुणो णवीकिदो विअ मे सन्दावो।** [हा! लावाणकं नाम। लावाणकसङ्कीर्तनेन पुनर्नवीकृत इव मे सन्तापः।]

**यौगन्धरायणः-अथ परिसमाप्ता विद्या?**

**ब्रह्मचारी**-न खलु तावत्।

**यौगन्धरायणः**-यद्यनवसिता, विद्या, किमागमनप्रयोजनम्?

**ब्रह्मचारी**-तत्र खल्वतिदारुणं व्यसनं संवृत्तम्।

**यौगन्धरायणः**-कथमिव?

**ब्रह्मचारी**-तत्रोदयनो नाम राजा प्रतिवसति।

**यौगन्धरायणः**-श्रूयते तत्रभवानुदयनः। किं सः?

**ब्रह्मचारी**-तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल।

**यौगन्धरायण**-भवितव्यम्। ततस्ततः?

**ब्रह्मचारी**-ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा।

**वासवदत्ता**-(आत्मगतम्) अलिअं अलिअं खु एदं। जीवामि मन्दभाआ। [अलीकमलीकं खल्वेतत्। जीवामि मन्दभागा।]

**यौगन्धरायणः**-ततस्ततः?

**ब्रह्मचारी**-ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः।

**यौगन्धरायणः**-सत्यं पतित इति। ततस्ततः?

**ब्रह्मचारी**-ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामा-ऽमात्यैर्महता यत्नेन वारितः।

**वासवदत्ता**-(आत्मगतम्) जाणामि जाणामि अय्यउत्तस्स मइ साणुक्कौसत्तणं। [जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम्।]

**यौगन्धरायणः**-ततस्ततः?

**ब्रह्मचारी**-ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजाऽमोहमुपगतः।

**सर्वे**-हा!

**वासवदत्ता**-(स्वगतम्) सकामो दाणिं अय्यजोअन्धराअणो होदु। [सकाम इदानीमार्ययौगन्धरायणो भवतु।]

**चेटी**-भट्टिदारिए! रोदिदि खु इयं अय्या। [भर्तृदारिके! रोदिति खल्वियमार्या।]

**पद्मावती**-साणुक्कोसाए होदव्वं। [सानुक्रोशया भवितव्यम्।]

**यौगन्धरायणः**-अथ किमथ किम्? प्रकृत्या सानुक्रोशा मे भगिनी। ततस्ततः?

**ब्रह्मचारी**–ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः।

**पद्मावती**–दिट्ठिआ धरइ। मोहं गदो त्ति सुणिअ सुण्णं विअ मे हिअअं। [दिष्ट्या ध्रियते। मोहं गत इति श्रुत्वा शून्यमिवं मे हृदयम्।]

**यौगन्धरायणः**–ततस्ततः?

**ब्रह्मचारी**–ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये! इति किमपि बहु प्रलपितवान्। किं बहना–

**नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।**
**धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाऽप्यदग्धा॥13॥**

**अन्वयः**–इदानीं तादृशाः चक्रवाकाः न एव। स्त्रीविशेषैः वियुक्ता अन्ये अपि तादृशा न एव। सा स्त्री धन्या, यां भर्ता तथा वेत्ति; हि भर्तृस्नेहात् सा दग्धा अपि अदग्धा॥13॥

**यौगन्धरायणः**–अथ भोः! तं तु पर्यवस्थापयितुं न कश्चिद् यत्नवानमात्यः?

**ब्रह्मचारी**–अस्ति रुमण्वान्नामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम्। स हि–

**अनाहारे तुल्यः प्रततरुदितक्षामवदनः**
**शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।**
**दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं**
**नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥14॥**

**अन्वयः**–(स हि) अनाहारे तुल्यः प्रततरुदितक्षामवदनः नृपतिसमदुःखं शरीरे संस्कारं परिवहन् दिवा वा रात्रौ वा यत्नैः नरपतिं परिचरति। नृपः प्राणान् त्यजति यदि, तस्य अपि सद्य उपरमः॥14॥

**वासवदत्ता**–(स्वगतम्) दिट्ठिआ सुणिक्खित्तो दाणौं अय्यउत्तौ। [दिष्ट्यार्थ सुनिक्षिप्त इदानीमार्यपुत्रः।]

**यौगन्धरायणः**–(आत्मगतम्) अहो! महद्भारमुद्वहति रुमण्वान्। कुतः–

**सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।**
**तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥15॥**

**अन्वयः**–हि अयं भारः सविश्रमः, तस्य तु श्रमः प्रसक्तः। हि तस्मिन् सर्वम् अधीनं, यत्र नराधिपः अधीनः॥15॥

**(प्रकाशम्)** अथ भोः? पर्यवस्थापित इदानीं स राजा?

**ब्रह्मचारी**–तदिदानीं न जाने। 'इहं तया सह हसितम्, इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्' इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृहीत्वापक्रान्तम्। ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः। ततोऽहमपि निर्गतोऽस्मि।

**तापसी**–सौ खु गुणवन्तो णाम राआ, जो आअन्तुएण वि इमिणा एव्वं पसंसीआदि। [स खलु गुणवान् नाम राजा, य आगन्तुकेनाप्यनेनैवं प्रशस्यते।]

**चेटी**–भट्टिदारिए! किं णु अवरा इत्थिआ तस्स हत्थं गमिस्सदि। [भर्तृदारिके! किन्नु खल्वपरा स्त्री तस्य

हस्तं गमिष्यति ?]

**पद्मावती**-(आत्मगतम्) मम हिअएण एव्व सह मन्तिदम्। [मम हृदयेनैव सह मन्त्रितम्।]

**ब्रह्मचारी**-आ पृच्छामि भवन्तौ। गच्छामस्तावत्।

**उभौ**-गम्यतामर्थसिद्धये।

**ब्रह्मचारी**-तथाऽस्तु।

(निष्क्रान्तः)

**यौगन्धरायणः**-साधु, अहमपि तत्र भवत्याऽभ्यनुज्ञातो गन्तुमिच्छामि।

**काञ्चुकीयः**-तत्रभवत्याऽभ्यनुज्ञातो गन्तुमिच्छति किल।

**पद्मावती**-अय्यस्य भइणिआ अय्येण बिना उक्तण्ठिस्तादि। [आर्यस्य भगिनिकाऽऽर्येण विनोत्कण्ठिष्यते।]

**यौगन्धरायणः**-साधुजनहस्तगतैषा नोत्कण्ठिष्यति। [काञ्चुकीयमवलोक्य) गच्छामस्तावत्।

**काञ्चुकीयः**-गच्छतु भवान् पुनर्दशनाय।

**यौगन्धरायणः**-तथाऽस्तु।

(निष्क्रान्तः)

**काञ्चुकीयः**-समय इदानीमभ्यन्तरं प्रवेष्टुम्।

**पद्मावती**-अय्ये! वन्दामि। [आर्ये! वन्दे।]

**तापसी**-जादे! तब सदिसं भत्तारं लभेहि। [जाते तब सदृशं भर्त्तारं लभस्व।]

**वासवदत्ता**-अय्ये! वन्दामि दाव अहं। [आर्ये! वन्दे तावदहम्।]

**तापसी**-तुवं पि अइरेण भत्तारं समासादेहि। [त्वमप्यचिरेण भर्त्तारं समासादय।]

**वासवदत्ता**-अणुग्गहीदह्मि। [अनुगृहीतास्मि]

**काञ्चुकीयः**-तदागम्यताम्। इत इतो भवति! सम्प्रति हि-

**खगा वासोपेताः सलिलमवगाढो मुनिजनः**
**प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।**
**परिभ्रष्टो दूराद् रविरपि च सङ्क्षिप्तकिरणो**
**रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥16॥**

**अन्वयः**-खगा वासोपेताः। मुनिजनः सलिलम् अवगाढ़ः। प्रदीप्तः अग्निः भाति। धूमो मुनिवनं प्रविचरति। दूरात् परिभ्रष्टः असौ रविः अपि संक्षिप्तकिरणः (सन्) रथं व्यावर्त्य शनैः अस्तशिखरं प्रविशति॥16॥

(निष्क्रान्ताः सर्वे)

।। इति प्रथमोऽङ्कः ।।

## श्लोकार्थः

1.9 **संस्कृत-व्याख्या**- यौगन्धरायणः स्वप्रार्थनायाः कारणं काञ्चुकीयं प्रति कथयति- वस्तुतः नाहं धनं इच्छामि, नैव मे सांसारिकैः भोगैः वसनैः किम् अपि प्रयोजनम् अस्ति। मया एषः परिव्राजक वेषः

अपि स्वोदरपूर्त्यर्थं न स्वीकृतः वर्तते। अपितु महाराजदर्शकस्य भगिनी एषा पद्मावती नाम्नी कन्या धीरस्वभावा विदुषी च वर्तते। अस्याः धार्मिककार्येषु प्रीतिः तपस्विषु च श्रद्धा मया स्वयमेव प्रत्यक्षं एव अवलोकिता अस्ति। अतोऽहं चिन्तये यत् मम प्रोषितभर्तृकायाः भगिन्याः चरित्रस्य संरक्षणे एषा पूर्णरूपेण समर्था अस्ति। एतदर्थं अहं स्व भगिनीं अस्याः संरक्षणे निक्षेप्तुकामोऽस्मि।

1.10 **अर्थः** – धनम्, दातु – वितरितुम्, सुख – सुखकरं अनायासं यथा स्यात्तथा, भवेत्-स्यात्, प्राणाः-असवः वातुं-समर्पयितुं सुखं आयासर हितं-भवेयुरितिवचनविपरिणामेनानुवर्तनीयम्। एकमेव तप-तपश्चरणम्, तः फलमिति यावत्, तपः शब्देन तत्फलं लक्ष्यते, दातुं सुखं भवेत्। अन्यत्- इतरत्, सर्वं-सकलं-वस्तुजातं सुखं अक्लेशेनैव दातुं भवेत्, किन्तु न्यासस्य-निक्षेपस्य, रक्षणं-पालनम्, तु दुखं-दुष्करम्। अयमाशयः – धनप्रणादीनां समस्तानां वस्तूनां वितरणं तावल्लोके सुकरं परं निक्षेपरक्षणं नामस्वस्मिन्नुत्तरदायिप्वेन सर्वथादुष्करम्। अत एव यौगन्धरायणस्य अभिलाषपूरणशक्यम्।

1.11 **संस्कृत-व्याख्या**- यौगन्धरायणः वासवदत्तां पद्मवत्याः संरक्षणे निक्षेपस्य कारणं मनसि चिन्तयति-पुष्पक-भद्रादिज्योतिर्विद्भिः पूर्वमेव स्वामिनः उदयनस्य राज्यहानिविषयकापत्तिः कथिता, सा तथैव घटिता। पुनः तैरेव भणितम् यत्— 'पद्मावती महाराजोदयनस्य महिषी भविष्यति, राज्यप्राप्ति अपि पुनः भविष्यति।' दैवज्ञानां तेषु वचनेषु विश्वासात् एव वासवदत्तान्यासरूपं इदं कर्म मया सम्पादितम्। कुतः फलगणनाविषये लब्धनैपुण्यानां दैवज्ञानां वाक्यानि सदैव यथार्थानि एव भवन्ति, कदापि असत्यं न भवन्ति। अतः मया एतत् कार्यं समीचीनं एव कृतम्।

1.12 **संस्कृत-व्याख्या**— आगन्तुकः ब्रह्मचारी समक्षे विद्यमानं भूभागं तपोवनं एतत्, इति विचारयति— अस्मिन् स्थेल मृगाः विश्वस्तो भूत्वा भयरहिताः इतस्ततः विचरन्ति शष्पतृणानि स्वेच्छया खादन्ति। प्रयत्नपूर्वकं रक्षिताः स्नेहेन पालिताः वृक्षाः समृद्धपुष्पफलयुक्ताः शाखिनः सन्ति। अत्र कपिलवर्णाः गावः आधिक्यरूपेण विद्यन्ते। अतः कपिलगोधनस्य बाहुल्यं अत्र विद्यते। दिक्षु कृषिकर्मयोग्यानि कर्षितानि भूखण्डानि न दृश्यन्ते। धूपकर्पूर-हविघृताद्यनेकपदार्थानां होमेन उद्भूतः सुगन्धितः धूमः परितः पलिक्ष्यते। अत्र मध्याह्नकालिकाः यज्ञाः स्थाने-स्थाने क्रियन्ते। अतः पुरः दृश्यमानं एतत् स्थानं तपोवनं एव इति सुनिश्चितं अस्ति।

1.13 **संस्कृत-व्याख्या**— ब्रह्मचारी वासवदत्तायाः वियोगे महाराजोदयनस्य विरहवेदनां कथयति— चक्रवाकपक्षिविषये काव्येषु विरहवेदनायाः प्रसिद्धिः अस्ति, किन्तु अस्मिन् समये उदयनस्य दुःखं तु तस्मात् अपि प्रबलं वर्तते। एवमेव सीतादिस्त्रीविशेषैः वियुक्तः राममादिवत् अन्यः कोऽपि जनः सम्प्रति न लक्ष्यते, यः उदयनवत् स्वप्रियायाः वियुक्तः प्रबलदुःखितः अस्ति। वस्तुतः सा स्त्री धन्या अस्ति, सौभाग्यवती खलु वर्तते, यां तस्याः पतिः एवं प्रेम करोति, अभिलषति वा। तस्याः विरहे क्षणं अपि स्थातुं, प्राणान् धारयितुं न च शक्यते। अहं तु अस्मिन् विषये एतत् मन्ये यत् यद्यपि सा वासवदत्ता दग्धा वस्तुतः, किन्तु यशः काये सा सम्प्रति अपि वर्तमाना, जीवति वा एवं पत्युः प्राणप्रिया सा दग्धा अपि अदग्धा एव परिलक्ष्यते, इति भावः।

1.14 **संस्कृत-व्याख्या**— अमात्यः रुमण्वान् केन प्रकारेण परिचर्यां करोति इति ब्रह्मचारी कथयति— नृपस्य निराहारे सति सः अपि भोजनं न करोति। राज्ञः निरन्तरविलापकरणे सः अपि अनवरतं रोदिति, अनेवैव अस्य मुखं मलिनतां भजते, निष्प्रभश्च सञ्जातः। नृपतिः इव सः अपि येन केन प्रकारेण दैनन्दिनीस्नानादिक्रियां कोरोति। वस्तुतः सः अहर्निशं राज्ञः उदयनस्य तन्मयरूपेण सेवां करोति। मन्ये,

यदि केनापि कारणेन राजा उदयनः स्व प्राणान् परित्यजति तर्हि तस्य रुमण्वतः अपि सद्यः एव मृत्युः भविष्यति। कुतः सः तु समर्पित— भावेन राजानं उदयनं एव अनुसरति इति भावः।

1.15 **संस्कृत-व्याख्या—** यौगन्धरायणः स्वमनसि रूमण्वतः प्रशंसां करोति— योजनानुसारं वासवदत्तायाः संरक्षणस्वरूपं मम कर्तव्यं अति सरलं अस्ति, किन्तु नृपरक्षण-रूपं रुमण्वतः कार्यं वस्तुतः कठिनं क्लेशदायकं वर्तते। कुतः सः तु रात्रौ दिवावपि जागर्ति। वस्तुतः यस्य संरक्षणे राजा भवति सम्पूर्णं राज्यकार्यं तस्य एव वशवर्तित भवति। सः वै राज्यपालनस्वरूपं महत् भरं उद्वहति। सः क्षणं अपि न विश्राम्यति। अतः प्रशंसनीयः रुमण्वान् अस्ति इदानीम्।

1.16 **संस्कृत-व्याख्या—** काञ्चुकीयः स्नानार्थं संध्याकालस्य वर्णनं करोति—एते पक्षिणः स्व-स्व निवासस्थानं आगताः। तपस्विनः सायंकालिकस्तनानार्थं जलं प्रविष्टाः। यज्ञार्थं प्रज्वलितः अग्निः सुशोभितः भवति दूरतः एव। अत्र सर्वत्रापि यज्ञं भवति, अतः होमधूमः तपोवनं सर्वत्र प्रसरति। परिश्रान्तः सूर्यः दूरदेशात् आकाशात् पतितः, संहृतकरः सः स्व रथं व्यावर्त्य मन्दं मन्दं अस्ताचलं प्रति गच्छति।

## अभ्यासः

**प्रश्न-1. कोष्ठात् उचितेन शब्देन रिक्तस्थानं पूरयत-**

(i) ............................ न्यासस्य रक्षणम्। (सुखम्/दुःखम्)

(ii) ...........विश्वासस्थानम् न्यासस्य। (पद्मावती/वासवदत्ता)

(iii) ............. तपोवनेन भवितव्यम्। (अभितः/परितः)

(iv) पुष्पफलैः समृद्धविटपाः......................। (वृक्षाः/वनम्)

(v) .............. दग्धाप्यदग्धा। (पद्मवती/वासवदत्ता)

(vi) प्रविचरति मुनिवनम्.....................। (धूमः/अग्निः)

**प्रश्न-2. एकपदेन उत्तरं लिखित-**

(i) भो! अहमर्थी! कः कथयति?

(ii) 'भर्तृकामिमानिच्छामि भवत्यापरिपाल्यमानम्' भर्तृका का?

(iii) नाहं काषायं वृत्तिहेतोऽप्रपन्नः। काषायं किम्?

(iv) धीरा कन्येयं दृष्टधर्मप्रचारा। का?

(v) 'अविचार्य कर्म न करिष्यति।'। कस्याः विचारः

(vi) दुःखं न्यासस्य रक्षणम्। कस्य कथनम्?

(vii) 'यदेष भणति तदनुतिष्ठतु आर्यः।' आर्यः कः?

(viii) अभ्युपगतम् भवतो भगिन्याः। 'भवतः' कस्यकृते प्रयुक्तः

(ix) 'अर्धमवसितं भारस्य' केन कथितम्?

(x) 'दृढ़मस्मिपरिश्रान्ता' कस्यात्मकथनम्?

**प्रश्न-3. एकवाक्येन उत्तरं लिखत-**

(i) तपोवने विश्रब्धं के चरन्ति?

(ii) आश्रमपदं किम्?

(iii) ब्रह्मचारी लावाणके किमर्थमुषितवान् आसीत्?

(iv) लावाणके कीदृशं व्यसनमापतितम्?

(v) उदयनं पर्यवस्थापितुं कः दृढ़ं प्रयत्नवान्?

(vi) उदयने प्राणपरित्यागे कस्योपरमः सुनिश्चितः?

(vii) लावणकग्रामाद् उदयने निष्क्रान्ते ग्रामः कीदृशः संवृत्तः?

(viii) उदयनः कस्या आज्ञायाश्रमात् निष्क्रान्तुमिच्छति?

(ix) वासवदत्तया वन्दिता तापसी किं वरं दत्तवती?

(x) खागाः वासोपेता..........प्रविशन्ति अस्तशिखरम् केन कदा कथितम्?

**प्रश्न-4. अधोलिखितानां पदानां प्रकृति प्रत्ययौ पृथक् पृथक् कुरुत।**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (i) | अर्थी | ................ | ................ |
| (ii) | दृष्ट्या | ................ | ................ |
| (iii) | क्रियताम् | ................ | ................ |
| (iv) | आगन्तुकः | ................ | ................ |
| (v) | काषायम् | ................ | ................ |
| (vi) | दातुम् | ................ | ................ |
| (vii) | परिभ्रष्टः | ................ | ................ |
| (viii) | गन्तुम् | ................ | ................ |
| (ix) | अभ्यनुज्ञातः | ................ | ................ |
| (x) | भवत्या | ................ | ................ |

**प्रश्न-5. उचितं युग्ममेलनं कुरुत-**

| | (क) | | (ख) |
|---|---|---|---|
| (i) | प्रोषितभर्तृका | – | दृष्टधर्मपचारा |
| (ii) | कन्येयम् | – | सुपरीक्षितानि |
| (iii) | चरित्रम् | – | पद्मावती |
| (iv) | मगधराजपुत्री | – | शीलम् |
| (v) | सिद्धवाक्यानि | – | आवन्तिका |

**प्रश्न-6. अधोलिखित उदाहरणानुसारं समस्तपदानि समासनाम च लिखत।**

| | समास विग्रहः | समस्तपदम् | समासनाम |
|---|---|---|---|
| (i) | दृष्टः धर्मस्य प्रचारः यस्याः | दृष्टधर्मप्रचारा | बहुव्रीहि समास |

| | | | |
|---|---|---|---|
| (ii) | निक्षेप्तु कामः यस्य सः | ................. | ................. |
| (iii) | पुष्पाणि च फलानि च | ................. | ................. |
| (iv) | गोकुलानि एव धनानि | ................. | ................. |
| (v) | ग्रामस्य दाहः तेन | ................. | ................. |
| (vi) | अभ्यवपत्तुं कामो यस्य सः | ................. | ................. |
| (vii) | प्रतिलब्धा संज्ञा येन सः | ................. | ................. |
| (viii) | साधुश्चासौ जनश्च- | ................. | ................. |

**प्रश्न-7. अधोलिखितानामव्ययानां वाक्यप्रयोगान् लिखत-**

ननु, अपि, खलु च, सह, समीपम्, इह

**प्रश्न-8. अधोलिखितेषु वाक्येषु क्तवतु-प्रत्ययान्त-पदानां क्त-प्रत्ययं प्रयुज्य वाक्यानि लिखत-**

(i) राजा किमपि बहु प्रलपितवान्।

(ii) स तस्मिन्नेवाग्नौ प्राणान् परित्यक्तवान्।

(iii) अमत्याः महता यत्नेन वारितवन्तः।

(iv) ततो सः निर्गतवान्।

(v) स मन्त्रिपदं त्यक्तवान्।

**प्रश्न-9. अद्योलिखितं श्लोकं पूरयित्वा तस्य अन्वयः लिखत-**

**नैवेदानीं तादृशाश्चक्रवाकाः............।**
**.............................. दग्धाऽप्यदग्धा॥**

## योग्यता-विस्तारः

**काव्यप्रयोजनम्**

- 'रसास्वादमुखमोदकदानं द्वारा आर्यमर्यादाविमुखानां विनेयानां कृत्याकृत्यप्रवृत्तिनिवृत्युपदेशः।'
- आत्मैव सर्वप्राणिपरप्रेमास्पदतत्त्वम्, तत्सम्बन्धादेवान्यत्र प्रीतिः।
- लोककल्याणमेव मुख्य-काव्य-प्रयोजकम्।
- भौतिक सुखापेक्षया मानसिकसुखं तदपेक्षयात्मसुखमुत्तरोत्तरमुत्तमम्।
- विभावानुभावसंचारिस्थायिनां संज्ञा अनादिसिद्धसाहित्यशास्त्रीयव्यवहारमूला इति भरतमतम्।
- रससंख्या नवैवेति भरतमुनिमतमेव सम्प्रदाय सिद्धम् संचारिणोऽपि त्रयस्त्रिंशदेवेति नियतम्।
- सर्वे भावा रसामिव्यञ्जकाः। तत्राष्टावेव स्थायिनः अष्टौ रससात्त्विकाः दृश्याचार्य परम्परायां पृथग्गणिताः। श्रव्यपरम्परायानुभावरूपा।
- साहित्यविद्यायाः आदिग्रन्थः नाट्यशास्त्रमेव।

❖ ❖ ★ ❖ ❖

॥श्री॥

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तम्

# द्वितीयोऽङ्कः

**पूर्वपीठिका**

**पूर्वेऽङ्के ब्रह्मचारी स्वकीयं वृत्तान्तं कथयन्नेव लावणकग्रामेऽग्निदाहेन वासवदत्तायाः यौगन्धरायणस्य चाग्निदाहं वर्णयित्वा तत्र भवतः उदयनस्य दिवारात्रौ रुमण्वता सेनानायकेन विविधैः यत्नैः परिचारणं विधाय तस्माद् ग्रामाद् निष्क्रान्ते राजनि आत्मनोऽपि निष्क्रामणं श्रावयाभास।**

**अनन्तरं ब्रह्मचारी यौगन्धरायणश्च काञ्चुकीयस्याज्ञया निर्गतौ पद्मावती आवन्तिका च तापसीं प्रणम्य वरं प्राप्य सति सूर्यास्ते काञ्चुकीयेन सह निष्क्रान्ते।**

**अतः परं प्रारभ्यते द्वितीयोऽङ्कः। पद्मावती सपरिवारा कन्दुकेन क्रीडति। तत्र चेटी श्रावयति यत् पद्मावत्या विवाहः उदययनेन सह निश्चितम्। तदैव वासवदत्तया मनसि विचारितम् यत् आर्यपुत्रः ममेदानीं परकीयः संवृत्तः। अथ च सा चिन्तातुराऽभवत्। द्वितीयाङ्कस्य उपान्ते चेटी भणति। ''अद्य किल शोभनं नक्षत्रम् अद्यैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति।''**

**श्रुत्वैतत् वासवदत्ता मनसि चिन्तयति।**

**''यथा यथा त्वरते तथा तथान्धीकरोति मे हृदयम्। अन्ते धात्र्या सह** सर्वे निष्क्रान्ताः।''

(ततः प्रविशति चेटी)

**चेटी**—कुञ्जरिए! कुञ्जरिए! कहिं कहिं भट्टिदारिआ पदुमावदी? किं भणाति, एषा भट्टिदारिआ माहवीलतामण्डवस्स पस्सदो कन्दुएण कीलदित्ति। जाव भट्टिदारिअं उवसप्यामि। (परिक्रम्यावलोक्य) अम्मो! इअ भट्टिदारिआ उक्करिदकण्णचुलिएण वाआमसञ्जादसेदबिन्दुविइत्तिदेण परिस्सन्तरमणीअदंसणेण मुहेण कन्दुएण कीलन्दी इदो एब्ब आअच्छदि। जाव उवसप्पिसस्स। [कुञ्जरिके! कुञ्जरिके! कुत्र कुत्र भर्तृदारिका पद्मावती? किं भणसि, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति। यावद् भर्तृदारिकामुपसर्पामि। अम्मो! इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायामसञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति। यावदुपसर्प्यामि]

(निष्क्रान्ता)

प्रवेशकः

(ततः प्रविशति कन्दुकेन क्रीडन्ती पद्मावती सपरिवारा वासवदत्तया सह।)

**वासवदत्ता**–हला! एसो दे कन्दुओ! [हला। एष ते कन्दुकः।]

**पद्मावती**–अय्ये! भोदु दाणिं एत्तअं। [आर्ये! भवत्विदानीमेतावत्।]

**वासवदत्ता**–हला! अदिचिरं कन्दुएण कीलिअ अहिअसञ्जादराआ परकेरआ विअ दे हत्था संदुत्ता। [हला अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागौ परकीयाविव ते हस्तौ संवृतौ।]

**चेटी**–कीलदु कीलदु दाव भट्टिदारिआ। णिष्वत्तोअदु दाव अअं कण्णाभावरमणीओ कालो। [क्रीडतु क्रीडतु तावद् भर्तृदारिका। निर्वर्त्यतां तावद् अयं कन्याभावरमणीयः कालः।]

**पद्मावती**–अय्ये! किं दाणिं मं ओहसिदुं विअ णिज्झाअसि? [आर्ये! किमिदानीं मामपहसितुमिव निध्यायसि?]

**वासवदत्ता**–णहि णहि! हला! अधिअं अज्ज सोहदि। अभिदो विअ दे अज्ज वरमुहं पेक्खामि। [नहि नहि। हला! अधिकमद्य शोभते। अभित इव तेऽद्य वरमुखं पश्यामि।]

**पद्मावती**–अवेहि। मा दाणिं मं ओहस। [अपेहि। मेदानीं मामपहस।]

**वासवदत्ता**–एसह्मि तुह्णीआ भविस्सम्महासेणबहू। [एषास्मि तूष्णीका भविष्यन्महासेनवधु।]

**पद्मावती**–को सो महासेणो णाम? [क एष महासेनो नाम?]

**वासवदत्ता**–अत्थि उज्जइणीओ राआ पज्जोदो णाम। तस्स परिमाणणिब्बुत्तं णामहेअं महासेणोत्ति। [अस्त्युज्जयिनीयो राजा प्रद्योतो नाम। तस्य परिमाणनिर्वृत्तं नामधेयं महासेन इति।]

**चेटी**–भट्टिदारिआ तेण रञ्ञा सह सम्बन्धं णेच्छदि। [भर्तृदारिका तेन राज्ञा सह सम्बन्धं नेच्छति।]

**वासवदत्ता**–अह केण खु दाणिं अभिलसदि? [अथ केन खल्विदानीमभिलषति?]

**चेटी**–अत्थि वच्छराओ उअअणो णाम। तस्स गुणाणि भट्टिदारिआ अभिलसदि। [अस्ति वत्सराज उदयनो नाम। तस्य गुणान् भर्तृदारिकाभिलषति।]

**वासवदत्ता**–(आत्मगतम्) अय्यउत्तं भत्तारं अभिलसदि। (प्रकाशम्) केण कारणेण? [आर्यपुत्रं भर्तारमभिलषति। केन कारणेन?]

**चेटी**–साणुक्कोसोत्ति। [सानुक्रोश इति।]

**वासवदत्ता**–(आत्मगतम्) जाणामि जाणामि। अअं वि जण एव्वं उम्मादिदो। [जानामि जानामि। अयमपि जन एवमुन्मादितः।]

**चेटी**–भट्टिदारिए! जदि सो राआ विरूवो भवे? [भर्तृदारिके! यदि स राजा विरूपो भवेत्?]

**वासवदत्ता**–णह णहि। दसणीओ एव्व। [नहि नहि। दर्शनीय एव।]

**पद्मावती**–अय्ये! कहं तुव जाणासि? [आर्ये! कथं त्वं जानासि?]

**वासवदत्ता**–(आत्मगतम्) अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो। किं दाणिं करस्सिं? होदु, दिट्ठं। (प्रकाशम्) हला! एव्व उज्जइणीओ जणो मन्तेदि। [आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः। किमिदानीं करिष्यामि? भवतु, दृष्टम्। हला! एवमुज्जयिनीयो जनो मन्त्रयते।]

**पद्मावती**–जुज्जइ। ण खु एसो उज्जइणीदुल्लहो। सव्वजणमणोभिरामं खु सोभाग्गं णाम। [युज्यते। न खल्वेष उज्जयिनीदुर्लभः। सर्वजनमनोऽभिरामं खलु सौभाग्यं नाम।]

(ततः प्रविशति धात्री।)

**धात्री**–जेदु भट्टिदारिआ। भट्टिदारिए। दिण्णासि। [जयतु भर्तृदारिका भर्तृदारिके! दत्तासि।]

**वासवदत्ता**–अय्ये! कस्य? [आर्ये! कस्मै?]

**धात्री**–वच्छराअस्स उदअणस्य। [वत्सराजायोदयनाय।]

**वासवदत्ता**–अह कुलसी सो राआ? [अथ कुशली स राजा?]

**धात्री**–कुसली सो आअदो। तस्स भट्टिदारिआ पडिच्छिदा अ। [कुशली स आगत:। तस्य भर्तृदारिका प्रतीष्टा च।]

**वासवदत्ता**–अच्चाहिदं। [अत्याहितम्।]

**धात्री**–किं एत्थ अच्चाहिदं? [किमत्रात्याहित्?]

**वासवदत्ता**–ण हु किंश्चि।, तह णाम सन्तप्पिय उदासीणो होदि त्ति। [न खलु किञ्चित्। तथा नाम सन्तप्योदासीनो भवतीति।]

**धात्री**–अय्ये! आअमप्पहाणाणि सुलहपय्यवत्थाणाणि महापुरुसहिअआणि होन्ति। [आर्ये! आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति।]

**वासवदत्ता**–अय्ये! सअं एव्व तेण वरिदा? [आर्ये स्वयमेव तेन वरिता?]

**धात्री**–णहि णहि। अण्णप्पओअणेण इह आअदस्स अभिजणविञ्आणवओरूवं पेक्खिअ सअं एव्व महाराएण दिण्णा। [नहि नहि। अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता।]

**वासवदत्ता**–(आत्मगतम्) एव्वं! अणवरद्धो दाणिं एत्थ अय्यउत्तो! [एवम्! अनपराद्ध इदानीमत्रार्यपुत्र:।]

(प्रविश्यापरा)

**चेटी**– तुवरदु तुवरदु दाव अय्या। अज्ज एव्व किल सोभणं णक्खत्तं। अज्ज एव्व कोदुअमङ्गलं कादव्वं त्ति अह्माणं भट्टिणी भणादि। [त्वरतां त्वरतां तावदार्या। अद्यैव किल शोभनं नक्षत्रम्। अद्यैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति।]

**वासवदत्ता**–(आत्मगतम्) जह जह तुवरदि, तह तह अन्धीकरेदि मे हिअअं। [यथा यथा त्वरते, तथा तथान्धीकरोति मे हृदयम्।]

**धात्री**–एदु एदु भट्टिदारिआ। [एत्वेतु भर्तृदारिका।]

(निष्क्रान्ता: सर्वे।)

इति द्वितीयोऽङ्क।

**अभ्यास:**

**प्रश्न–1. एकपदेनोत्तरत–**

(i) कन्दुकेन का क्रीडति?

(ii) कुञ्जरिका कास्ति?

(iii) 'हला एष ते कन्दुक:' का कथयति?

(iv) 'अयं रमणीय: कन्याभाव काल:' का कथयति?

(v) 'हला अधिकमद्य शोभते' कया कथितम्?

(vi) 'महासेन' इति कस्य ख्याति'?

(vii) सानुक्रोशः इति कस्यकृते प्रयुक्तः?

(viii) 'नहि नहि दर्शनीयः एव' दर्शनीयः कः?

(ix) 'आर्यपुत्रसमुदाचारेणातिक्रान्तो समुदाचारः। कया कथितम्

(x) 'स्वयमेव तेन वरिता' तेन इति कस्यकृते?

**प्रश्न-2. एकवाक्येनोत्तरत-**

(i) कौतुकमङ्गलम् किम्?

(ii) पद्मावती उदयनाय केन दत्ता?

(iii) सौभाग्यम् किम्?

(iv) एवमुज्जयनीयो जनो मन्त्रयते, कया कस्य विषये कथितम्?

(v) पद्मावती केन सह सम्बन्धं नेच्छति?

**प्रश्न-3. अधोलिखितानां उचितं संयोजनं कुरुत-**

| | **"क"** | **"ख"** |
|---|---|---|
| (i) | तेन राज्ञा सह | अतिक्रान्तो समुदाचारः |
| (ii) | आर्यपुत्रस्य पक्षपातेन | भर्तृद्वारिकाभिलषति |
| (iii) | वत्सराज उदयनस्य गुणान् | सम्बन्धं नेच्छति |
| (iv) | अद्यैव किल | शोभनं नक्षत्रम् |

**प्रश्न-4. रिक्त स्थानानि कोष्ठके लिखितेन पदेन पूरयत-**

**[ मन्त्रयते, केन, कन्दुकेन, पार्श्वतः, मुखेन ]**

(i) परिश्रान्तदर्शनेन .................. क्रीडन्तीत एवागच्छति।

(ii) लतामण्डपस्य .................. क्रीडति।

(iii) प्रविशति............ क्रीडन्ती सपरिवारा वासवदत्ता च।

(iv) अथ ................ इदानीमभिलषति।

(v) एवमुज्जयीनो जनो....................।

**प्रश्न-5. अद्योलिखितानां पदानां प्रकृतिप्रत्ययां लिखत -**

| | **पदम्** | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|---|
| (i) | जानामि | .................. | .................. |
| (ii) | भवितव्यम् | .................. | .................. |
| (iii) | तूष्णीका | .................. | .................. |
| (iv) | उज्जयिनीयः | .................. | .................. |
| (v) | वरिता | .................. | .................. |

**प्रश्न-6. अद्योलिखितानां समासविग्रहानां समस्तपदानि समासनामानि च लिखत।**

(i) न अपराद्धः

(ii) अन्यच्च तत्प्रयोजनम्

(iii) महान्तश्च ते पुरुषाः

(iv) सर्वे च ते जना

(v) महासेनस्य वधूः

**प्रश्न-7. अधोलिखितानां अव्ययपदानां वाक्यप्रयोगां कुरुत-**

(i) तावत्

(ii अभितः

(iii) सह

(iv) यदि

(v) न खलु

(vi) किल

**प्रश्न-8. द्वितीयाऽङ्कानुसारमुदयनस्य वैशिष्ट्यं लिखत।**

**प्रश्न-9. नाटके प्रवेशकस्य लक्षणं लिखत।**

## योग्यताविस्तारः

**भासनाटकेषु अङ्कानां श्लोकानां च संख्या**

| | नाटकानि | अङ्काः | श्लोकानां संख्या |
|---|---|---|---|
| (1) | स्वप्नवासवदत्तम् | 06 | 57 |
| (2) | प्रतिज्ञायौगन्धरायणम् | 04 | 65 |
| (3) | अविमारकम् | 06 | 95 |
| (4) | प्रतिमानाटकम् | 07 | 157 |
| (5) | मध्यमव्यायोगः | 03 | 154 |
| (6) | पञ्चरात्रम् | 03 | 154 |
| (7) | अभिषेकनाटकम् | 06 | 103 |
| (8) | दूतवाक्यम् | 01 | 56 |
| (9) | दूतघटोत्कचम् | 01 | 52 |
| (10) | कर्णभारम् | 01 | 25 |
| (11) | उरुभङ्गम् | 01 | 56 |
| (12) | बालचरितम् | 05 | 103 |
| (13) | चारुदत्तम् | 04 | 55 |

❖ ❖ ★ ❖ ❖

॥श्री॥

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तम्

# तृतीयोऽङ्कः

**पूर्वपीठिका**

**द्वितीयाङ्कस्यान्ते चेटी कथयति ''अद्यैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति। तदनन्तरं वासवदत्तात्मगतं चिन्तयति ''यथा यथा त्वरते तथा तथाऽन्धीकरोति मे हृदयम्'' इति चिन्तयन्ती सा धात्र्या सह निष्क्रान्ता एतदनन्तरं तृतीयाङ्कस्य प्रारम्भे विचिन्तयन्ती वासवदत्ता प्रविशति स्वकीयां मनः स्थितिं प्रगटीकरोतिः आवन्तिका वेषधारिणी।**

(ततः प्रविशति विचिन्तयन्ती वासवदत्ता।)

**वासवदत्ता**—विवाहामोदसङ्कुले अन्तेउरचउस्साले परित्तजिअ पदुमावदिं इह आअदह्मि पमदवणं। जाब दाणि भाअधेअणिब्बुत्तं दु:खं विणोदेमि। (परिक्रम्य) अहो! अच्चाहिदं। अय्यउत्तो वि णाम परकेरओ संवुत्तो। जा उववसामि। (उपविश्य) धण्णा खु चक्कवाअबहू, जा अण्णोण्णविरहिदा ण जीवइ। ण खु अहं पाणाणि पदित्तजामि। अय्यउत्तं पेक्खामि त्ति एदिणा मणोरहेण जीवामि मन्दभाआ। [विवाहामोदसङ्कुले अन्त:पुरचतु:शाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम्। यावदिदानीं भागधेयनिर्वृत्तं दु:खं विनोदयामि। अहो! अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। यावत् उपविशामि। धन्या खलु चक्रवाकवधूः, याऽन्योन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीत्येतेन मनोरथेन जीवामि मन्दभागा।]

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी।)

**चेटी**-कहिं णु खु गदा अय्या आवन्तिआ? (परिक्रम्यावलोक्य) अम्मो! इयं चिन्तासुण्णहिअआ णीहारपडिहदचन्दलेहा विअ अमण्डिदभद्दअं वेसं धाराअन्दी पिअङ्गुसिलापट्टए उवविट्ठा। जाव उवसप्पामि (उपसृत्य) अय्ये! आवन्तिए! को कालो, तुमं अण्णेसामि। [क्व नु खलु गता आर्यावन्तिका? अम्मो! इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवामण्डितभद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उपविष्टा। यावदुपसर्पामि। आर्ये! आवन्तिके! कः कालः, त्वामन्विष्यामि।]

**वासवदत्ता**-किं णिमित्तं? [किं निमित्तम्?]

**चेटी**-अह्माणं भट्टिणी भणादि महाकुलप्पसूदा सिणिद्धा णिउत्ता त्ति इमं दाव कोदुअमालिं गुह्मदु अय्या। [अस्माकं भट्टिनी भणति-महाकुलप्रसूतास्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुम्फत्वार्या।]

**वासवदत्ता**-अह कस्त किल गुह्मिदव्वं? [अथ कस्मै किल गुम्फितव्यम्?]

**चेटी**-अम्हाअं भट्टिदारिआए। [अस्माकं भर्तृदारिकायै।]

**वासवदत्ता**-(आत्मगतम्) एवं पि मए कत्तव्वं आसी। अहो अकरुणा खु इस्सरा। [एतदपि मया कर्तृव्यमासीत्। अहो! अकरुणाः खल्वीश्वराः।]

**चेटी**-अय्ये! मा दाणिं अण्णं चिन्तिअ। एसो जामादुओ मणिभूमिए ह्लाअदि। सिग्धं दाव गृह्यदु अय्या। [आर्ये! मेदानीमन्यच्चिन्तयित्वा। एष जामाता मणिभूम्यां स्नायति। शीघ्रं तावद् गुम्फत्वार्या।]

**वासवदत्ता**-(आत्मगतम्) ण सक्कुणोमि अण्णं चिन्तेदुं। (प्रकाशम्) हला! किं दिट्ठो जामादुओ? [न शक्नोम्यन्यच्चिन्तयितुम्। हला! किं दृष्टो जामाता?]

**चेटी**-आम्, दिट्ठो भट्टिदारिआए सिणेहेण अह्माअं कोदूहलेण अ। [आम्, दृष्टो भर्तृदारिकायाः स्नेहेनास्माकं कौतूहलेन च।]

**वासवदत्ता**-कीदिसो जामादुओ? [कीदृशो जामाता?]

**चेटी**-अय्ये! भणामि दाव, ण ईरिसो दिट्टपुरुवो। [आर्ये, भणामि तावत्, नेदृशो दृष्टपूर्वः।]

**वासवदत्ता**-हला! भणाहि भणाहि, किं दंसणीओ? [हला! भण भण, किं दर्शनीयः?]

**चेटी**-सक्कं भणिदुं सरचावहीणो खामदेवो त्ति। [शक्यं भणितुं शरचापहीनः कामदेव इति।]

**वासवदत्ता**-होदु एत्तअं। [भवत्वेतावत्।]

**चेटी**-किण्णिमित्तं वारेसि? [किंनिमित्तं वारयसि?]

**वासवदत्ता**-अजुत्तं परपुरुससङ्कित्तणं सोदुम्। [अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम्।]

**चेटी**-तेण हि गुह्मदु अय्या सिग्धं। [तेन हि गुम्फत्वार्या शीघ्रम्।]

**वासवदत्ता**-इअं गुह्मामि। आणहि दाव। [इयं गुम्फामि। आनय तावत्।

**चेटी**-गह्लादु अय्या। [गृह्णात्वार्या।]

**वासवदत्ता**-(वर्जयित्वा विलोक्य) इम दाव ओसहं किं णाम? [इदं तावदौषधं किं नाम?]

**चेटी**-अविहवाकरणं णाम। [अविधवाकरणं नाम।]

**वासवदत्ता**-(आत्मगतम्) इदं वहुसो गुह्मिदव्वं मम अ पदुमावदीए अ। (प्रकाशम्) इमं दाव ओसहं किं णाम? [इदं बहुशो गुम्फितव्यं मह्यं च पद्मावत्यै च। इदं तावदौषधं किं नाम?

**चेटी**-सवत्तिमद्दणं णाम। [सपत्नीमर्दनं नाम।]

**वासवदत्ता**-इदं ण गुह्मिदव्वं। [इदं न गुम्फितव्यम्।]

**चेटी**-कीस? [कस्मात्?]

**वासवदत्ता**-उवरदा तस्स भय्या, तं णिप्पओअणं ति। [उपरता तस्व भार्या, तन्निष्प्रयोजनमिति।]

(प्रविश्यापरा)

**चेटी**-तुवरतु तुवरदु अय्या। एसो जामादुओ अविहवाहि अब्भन्तरचउस्सालं पचेसीअदि। [त्वरतां त्वरतामार्या। एष जामाता अविधवाभिरभ्यन्तरचतुश्शालं प्रवेश्यते।]

**वासवदत्ता**-अइ! वदामि, गह्ण एदं। [अयि! वदामि, गृहाणैतत्।]

**चेटी**-सोहणं। अय्ये। गच्छामि दाव अहं। [शोभनम्। आर्ये! गच्छामि तावदहम्।]

(उभे निष्क्रान्ते।)

3.51 **वासवदत्ता**–गदा एसा। अहो! अच्चाहिदं। अय्यउत्तो वि णाम परकेरओ संवुत्तो। अविदा! सय्याए मम दुक्खं विणोदमि, जदि णिद्दं लभामि। [गतैषा। अहो! अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। अविदा! शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे।]

(निष्क्रान्ता।)

।। इति तृतीयोऽङ्कः।।

## अभ्यासः

**प्रश्न–1. एकपदेनोत्तरत–**

(1) विवाहामोदसंकुले अन्तःपुर चतुःशाले पद्मावतीं विहाय प्रमदवनं का गतवती?

(2) धन्याः खलु चक्रवाकवधूः कस्याः विचारः?

(3) क्वनु खलु गतार्यावन्तिका कस्याः आत्मकथनेम्? चेट्या?

(4) भट्टिनी का?

(5) कौतुकमालिका कस्यै गुम्फिता?

(6) 'अहो अकरुणाः खल्वीश्वराः' कस्या आत्मोद्‌गारः?

(7) जामाता कः?

(8) मणिभूम्यां कः स्नानशीलः?

(9) शरचापहीनः कामदेवः कः?

(10) मालायां किमौषधं गुफ्फनीयम्?

(11) 'इदं न गुम्फितव्यम्' अत्र किं तर्कयति आवन्तिका?

(12) आर्यपुत्रोऽपि परकीयः संवृतः। कस्याः कथनम्?

**प्रश्न–2. एकवाक्येन उत्तरं लिखत–**

(1) 'अयुक्तं परपुरुषसंकीर्तनम्' कमधिकृत्य कया कथितम्?

(2) सपत्नीमर्दनं नाम औषधं कथं न गुम्फितव्यम्।

(3) चतुश्शालं काभिः का प्रविशति।

(4) कीदृशोजामातेति पृष्टे चेटी किंवदति?

(5) चेटी उदयनं कि कथयित्वा प्रशंसति?

**प्रश्न–3. अधोलिखितानां पदानां प्रकृति प्रत्ययाः पृथक् पृथक् कुरुत–**

| **पदम्** | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|
| उपविष्टा | ...................... | ...................... |
| वर्जयित्वा | ...................... | ...................... |
| धारयवन्ती | ...................... | ...................... |

| | | |
|---|---|---|
| उपसृत्य | ...................... | ...................... |
| गुम्फतु | ...................... | ...................... |
| उपविशामि | ...................... | ...................... |
| विरहिता | ...................... | ...................... |
| आवन्तिका | ...................... | ...................... |
| जामाता | ...................... | ...................... |
| गुम्फितव्यम् | ...................... | ...................... |
| उपविशामि | ...................... | ...................... |
| विरहिता | ...................... | ...................... |
| आवन्तिका | ...................... | ...................... |
| उपविष्टः | ...................... | ...................... |
| जामाता | ...................... | ...................... |
| गुम्फितव्यम् | ...................... | ...................... |

**प्रश्न-4. अधोलिखितानां अव्ययपदानां वाक्यप्रयोगां कुरुत-**

खलु, इह, अहो, तथा, यथा, यावत्

**प्रश्न-5. उचितं युग्ममेलनं कुरुत-**

| **'क'** | | **'ख'** |
|---|---|---|
| भर्तृदारिका | - | उदयनः |
| जामाता | - | कामदेवः |
| पञ्चशरः | - | मङ्गलसूत्रबन्धनम् |
| कौतुकमङ्गलम् | - | दर्शकस्य पत्नी |

**प्रश्न-6. अधोलिखितानां समस्तपदानां विग्रहः समासनाम च लिखत-**

| **समस्तपदानि** | **विग्रहः** | **समासनाम** |
|---|---|---|
| मन्दभागा | ...................... | ...................... |
| दृष्टपूर्वः | ...................... | ...................... |
| शरचापहीनः | ...................... | ...................... |

**प्रश्न-7. अधोलिखितानां धातूनां समक्षं प्रत्ययः लिखितः तेन पदरचना कार्या-**

| **धातवः** | | **प्रत्ययाः** | **पदानि** |
|---|---|---|---|
| (1) | परि + क्रमु | क्त्वा (ल्यप्) | ...................... |
| (2) | उप + विश् | क्त | ...................... |
| (3) | गुम्भ | लोट्+तिप् | ...................... |

| | | | |
|---|---|---|---|
| (4) | कृ | तव्यत् | ...................... |
| (5) | श्रु | तुमुन् | ...................... |
| (6) | वृजु | क्त्वा | ...................... |
| (7) | वच् | क्त्वा | ...................... |

**प्रश्न-8. रिक्तस्थानानां पूर्तिं विधेया-**

**[ अहो, इदम्, अयुक्तम्, वदामि, शय्यायाम् ]**

(1) ...................... मम दुःखं विनोदयामि।

(2) अयि.................गृहाणेतद्।

(3) .................. परपुरुषसङ्कीर्तनं श्रोतुम्।

(4) .................... तपोवनं किं नाम?

(5) .................. अकरुणाः खल्वीश्वराः।

**प्रश्न-9. तृतीयाऽङ्कस्य नाटयवस्तु संक्षेपतः लेख्यम्। अस्याङ्कस्य वैशिष्ट्यं किम्?**

❖ ❖ ★ ❖ ❖

॥श्री॥

**महाकविश्रीभासप्रणीतं**

**स्वप्नवासवदत्तम्**

# चतुर्थोऽङ्कः

**पूर्वपीठिका**

**तृतीयाङ्कस्यान्ते वासवदत्तया गुम्फितां मालां नीत्वा चेटी निष्क्रान्ता। वासवदत्तयार्यपुत्रोऽपि परकीयः संवृतः इति विचार्य स्वदुःखविनोदयार्थं निद्रार्थं शय्यायां गच्छति।**

**एतदनन्तरं सहर्षं विदूषकस्य प्रवेशेन प्रारम्भ्यते चतुर्थोऽङ्कः।**

(ततः प्रविशति विदूषकः।)

**विदूषकः**—(सहर्षम्) भो! दिट्ठिआ तत्तहोदो वच्छराअस्स अभिप्पेदविवाहमङ्गलरमणिज्जो कालो दिट्ठो। भो! कों णाम एवं जाणादि-तादिसे वयं अणत्थसलिलावत्ते पक्खित्ता उण उम्मज्जिस्सामो त्ति। इदाणिं पासादेसु वसीअदि, अन्देउरदिग्घिआसु ह्लाईअदि, पकिदिमउरसुउमाराणि मोदअखज्जआणि खज्जीअन्तित्ति अणच्छरसंवासो उत्तरकुरुवासो मए अणुभवीअदि। एक्को खु महन्तो दोसो, मम आहारो सुट्ठु ण परिणमदि, सुप्पच्छदणाए सय्याए णिद्दं ण लाभामि। जह आदसोणिदं अभिदो विअ वत्तदि त्ति पेक्खामि! मो! सुहं णामअपरिभूदं अकल्लवंत्तं च। [भोः! दिष्ट्या तत्रभवतो वत्सराजस्याभिप्रेतविवाहमङ्गलरमणीयः कालो दृष्टः। भोः। को नामैतज्जानाति-तादृशे वयमनर्थसलिलावर्ते प्रक्षिप्ताः पुनरुन्मङ्क्ष्यामः इति। इदानीं प्रसादेषूष्यते, अन्तः पुरदीर्घिकासु स्नायते, प्रकृति-मधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इत्यनप्सरस्सवास उत्तरकुरुवासो मयानुभूयते। एकः खलु महान् दोषः, ममाहारः सुष्ठु न परिणमति, सुप्रच्छदनायां शय्यायां निद्रां न लभे। यथा वातशोणितमभित इव वर्तत इति पश्यामि। भोः। सुखं नामयपरिभूतमकल्यवर्त च।]

(ततः प्रविशति चेटी)

**चेटी**-कहिं णु खु गदो अय्यवसन्तओ? (परिक्रम्यावलोक्य) अह्मो एत्तो अय्यवसन्तओ (उपगम्य) अय्य! वसन्तअ! को कालो तुमं अण्णेसामि। [कुत्र नु खलु गत आर्यवसन्तकः? अहो! एष आर्यवसन्तकः। आर्य वसन्तक। कः कालः, त्वामन्विष्यामि।]

**विदूषकः**-(दृष्ट्वा) किंणिमित्तं भद्दे! मं अण्णेससि? [किन्निमित्तं भद्रे मामन्विष्यसि?]

**चेटी**-अह्माणं भट्टिणी भणादि-अवि ह्लादो जामादुओ त्ति। [अस्माकं भट्टिनी भणति-अपि स्नातो जामातेति।]

**विदूषकः**-किंणिमित्तं भोदि पुच्छदि। [किंनिमित्तं भवती पृच्छति?।

**चेटी**–किमण्णं। सुमणोवण्णअं आणेमि त्तिं। [किमन्यत् सुमनोवर्णकमानयामीति।]

**विदूषकः**–ह्लादो तत्तभवं। सव्वं आणेदु भोदी वज्जिअ भोअणं। [स्नातस्तत्रभवान्। सर्वमानयतु भवती वर्जयित्वा भोजनम्।]

**चेटी**–किंणिमित्तं वारेसि भोअणं? [किंनिमित्तं वारयसि भोजनम्?]

**विदूषकः**–अधण्णस्स मम कोइलाणं अक्खिपरिवट्टो विअ कुक्खिपरिवट्टो संदुत्तो। [अधन्यस्य मम कोकिलानामक्षिपरिवर्त इव कुक्षिपरिवर्तः संवृत्तः।]

**चेटी**–ईदिसो एव्व होदि। [ईदृश एव भव।]

**विदूषकः**–गच्छदु भोदी। जाव अहं वि तत्तहोदो सआसं गच्छामि। [गच्छतु भवती। यावदहमपि तत्रभवतः सकाशं गच्छामि।]

(निष्क्रान्तौ।)

।। प्रवेशकः ।।

(ततः प्रविशति सपरिवारा पद्मावती आवन्तिकावेषधारिणी वासवदत्ता च।)

**चेटी**–किंण्णिमित्तं भट्टिदारिआ पमदवणं आअदा? [किंनिमित्तं भर्तृदारिका प्रमदवनमागता?]

**पद्मावती**–हला! ताणि दाव सेहालिआगुह्मआणि पेक्खामि कुसुमिदाणि वा ण वेत्ति [हला! ते तावत् शेफाालिकागुल्मकाः पश्यामि कुसुमिता वा न वेति।]

**चेटी**–भट्टिदारिए! ताणि कुसुमिदाणि णाम, पवालन्तरिदेहिं विअ मीतिआलम्बएहिं आइदाणि कुसुमेहिं [भर्तृदारिके! ते कुसुमिता नाम, प्रवालान्तरितैरिव मौक्तिकलम्बकैराचिताः कुसुमैः।]

**पद्मावती**–हला! जदि एव्वं, किं दाणि विलम्बेसि? [हला! यद्येवं किमिदानी विलम्बसे?]

**चेटी**–तेण हि इमस्सिं सिलावट्टए मुहूत्तअं उपविसदु भट्टिदारिआ। जाव अहं वि कुसुमावचअं करोमि। [तेन हि अस्मिन् शिलापट्टके मुहूर्तकमुपविशतु भवती। यावदहमपि कुसुमावचयं करोमि।]

**पद्मावती**–अय्ये किं एत्थ उववसामो? [आर्ये! किमत्रोपविशावः?]

**वासवदत्ता**–एव्वं होदु। [एवं भवतु।]

(उभे उपविशतः।)

**चेटी**–(तथा कृत्वा) पेक्खदु पेक्खदु भट्टिदारिआ अद्धमणसिलावट्टएहिं विअ सेहालिआकुसुमेहिं पूरिअं मे अञ्जलिं! [पश्यतु भर्तृदारिका अर्धमनःशिलापट्टकैरिव शेफालिकाकुसुमैः पूरितं मेऽञ्जलिम्।]

**पद्मावती**–(दृष्टवा) अहो। विइत्तदा कुसुमाणं। पेक्खदु पेक्खदु अय्या। [अहो! विचित्रता कुसुमानाम्। पश्यतु पश्यत्वार्या।]

**वासवदत्ता**–अहो! दस्सणीअदा कुसुमाणं [अहो! दर्शनीयता कुसुमानाम्।]

**चेटी**–भट्टिदारिए! किं भूयो अवइणुस्सं? [भर्तृदारिके! किं भूयोऽवचेष्यामि?]

**पद्मावती**–हला! मा मा भूयो अवइणिअ। [हला! मा मा भूयोऽवचित्य।]

**वासवदत्ता**–हला! किंणिमित्तं वारेसि? [हला! किंनिमित्तं वारयसि?]

**पद्मावती**– अय्यउत्तो इह आअच्छिअ इमं कुसुमसमिद्धिं पेक्खिअ सम्मणिदा भवेअं। [आर्यपुत्र इहागत्येमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम्।]

**वासवदत्ता**-हला! पिओ दे भत्ता? [हला! प्रियस्ते भर्ता?]

**पद्मावती**-अय्ये! ण जाणामि, अय्यउत्तेण विरहिदा उक्कण्ठिदा होमि। [आर्ये! न जानामि, आर्यपुत्रेण विरहितोत्कण्ठिता भवामि।]

**वासवदत्ता**-(आत्मगतम्) दुक्खरं खु अहं करोमि। इअं वि णाम एवं मन्तेदि। [दुष्कर खल्वहं करोमि। इयमपि मामैव मन्त्रयते।]

**चेटी**-अभिजादं खु भट्टिदारिआए मन्तिदं-पिओ मे भत्तेति। [अभिजातं खलु भर्तृदारिकया मन्त्रितं-प्रियो मे भर्तेति।]

**पद्मावती**-एक्को खु मे सन्देहो। [एकः खलु मे सन्देहः।]

**वासवदत्ता**-किं किं? [किं किम्?]

**पद्मावती**-जह मम अय्यउत्तो, तह एव्व अय्याए वासवदत्ताए? [यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताया इति।]

**वासवदत्ता**-अदो वि अहिअं! [अतोऽप्यधिकम्।]

**पद्मावती**-कहं तुवं जाणासि? [कथं त्वं जानासि?]

**वासवदत्ता**-(आत्मगतम्) हं, अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो। एव्वं दाव भणिस्सं (प्रकाशम्) जइ अप्पो सिणेही, सा सजणं ण परित्तजदि। [हम्, आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः। एवं तावद् भणिष्यामि। यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति।]

**पद्मावती**-होदव्वं [भवितव्यम्।]

**चेटी**-भट्टिदारिए! साहु भत्तारं भणाहि-अहं पि वीणं सिक्खिस्सामि त्ति। [भर्तृदारिके! साधु भर्तारं भण अहमपि वीणां शिक्षिष्य इति।]

**पद्मावती**-उत्तो मए अय्यउत्तो। [उक्तो ममार्यपुत्रः।]

**वासवदत्ता**-तदो किं भणिदं? [ततः किं भणितम्?]

**पद्मावती**-अभणिअ किञ्चि दिग्धं णिस्ससिअ तुह्णीओ संवृत्ता। [अभणित्वा किञ्चिद् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः।]

**वासवदत्ता**-तदो तुवं कि विअ तक्केसि? [ततस्त्वं किमिव तर्कयसि?]

**पद्मावती**-तक्केमि अय्याए वासवदत्ताए गुणाणि सुमरिअ दक्खिणदाए मम अग्गदो ण रोदिदि त्ति। [तर्कयाम्यार्याया वासवदत्ताया गुणान् स्मृत्वा दक्षिणतया ममाग्रतो न रोदितीति।]

**वासवदत्ता**-(आत्मगतम्) धण्णा खु ह्मि, जदि एव्वं सच्चं भवे। [धन्या खल्वस्मि, यद्येवं सत्यं भवेत्।]

(ततः प्रविशति राजा विदूषकश्च।)

**विदूषकः**-ही! ही! पचिअपडिअबन्धुजीवकुसुमविरलवादरमणिज्जं पमदवणं। इदो दाव भवं। [ही ही! प्रचितपतितबन्धुजीवकुसुमविरलपातरमणीयं प्रमदवनम्। इतस्तावद् भवान्।]

**राजा**-वयस्य! वसन्तक! अयमहमागच्छामि।

**कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते**
**दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।**

**तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं**
**पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः॥1॥**

**अन्वयः** - तदा उज्जयिनीं गते अवन्तिराजतनयां स्वैरं दृष्ट्वा काम् अपि अवस्थां गते मयि कामेन पञ्च इषवः पातिताः। अद्य अपि तैः हृदयं सशल्यम् एव। भूयश्च वयं विद्धाः। मदनः पञ्चेषुः यदि, अयं षष्ठः शरः कथं पातितः?॥1॥

**विदूषकः**-कहिं णु खु गदा तत्तहोदी पदुमावदी, लदामण्डवं गदा भवे, उदाहो असणकुसुमसश्चिदं वग्धचम्मावगुण्ठिवं विअं पव्वदतिलअं णाम सिलापट्टअं गदा भषे, आदु अधिअकडुअगन्धसत्तच्छदवणं पविट्टा भवे, अहव आलिहिदमिअपक्खिसङ्कुलं दारुपव्वदअं गदा भवे! (ऊर्ध्वमवलोक्य) ही! ही! सरअकालणिम्मले अन्तरिक्खे पसारिअबलदेवबाहुदंसणीअं सारसपन्तिं जाव समाहिदं गच्छतिं पेक्खद दाव भव। [कुत्र नु खलु गता तत्र भवती पद्मावती, लतामण्डपं गता भवेत्, उताहो असलकुसुमसश्चितं व्याघ्रचर्माऽवगुण्ठितमिव पर्वततिलकं नाम शिलापट्टकं गता भवेत्, अथवा अधिककटुकगन्धसप्तच्छदवनं प्रविष्टा भवेत्, अथवा आलिखितमृगपक्षिसङ्कुलं दारुपर्वतकं गता भवेत्। हि! हि! शरत्कालनिर्मलेऽन्तरिक्षे प्रसारितबलदेवबाहुदर्शनीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीं पश्यतु तावद् भवान्।]

**राजा**-वयस्य! पश्याम्येनाम्।

**ऋज्वायतां च विरलां च नतोन्नतां च सप्तर्षिवंशकुटिलां च निवर्तनेषु।**
**निर्मुच्यमानभुजगोदरनिर्मलस्य सीमामिवाम्बरतलस्य विभज्यमानाम्॥2॥**

**अन्वयः**-ऋज्वायतां विरलां नतोन्नतां निवर्तनेषु सप्तर्षिवंशकुटिलां निर्मुच्यमानभुजगोदरनिर्मलस्य अम्बरतलस्य विभज्यमानां सीमाम् इव, एनां सारसपङ्क्तिं पश्यामि॥2॥

**चेटी**-पेक्खदु पेक्खदु भट्टिदारिआ एवं कोकणदमालापण्डररमणीअं सारसपन्तिं जाव समाहिदं गच्छन्ति। अम्भो। भट्टा। [पश्यतु पश्यतु भर्तृदारिका एतां कोकनदमालापाण्डुररमणीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीम्। अहो! भर्ता।]

**पद्मावती**-हं! अय्यउत्तो। अय्ये। तब कारणादो अय्यउत्तदंसणं परिहरामि। ता इमं दाव माहवीलदामण्डवं पविसामो। [हम्! आर्यपुत्रः। आर्ये! तव कारणादार्यपुत्रदर्शनं परिहरामि। तदिमं तावन्माधवीलतामण्डपं प्रविशामः।

**वासवदत्ता**-एव्वं होदु। [एवं भवेत्।]

(तथा कुर्वन्ति)

**विदूषकः**-तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे। [तत्रभवती पद्मावतीहागत्य निर्गता भवेत्।]

**राजा**-कथं भवान् जानाति।

**विदूषकः**-इमाणि अवइदकुसुमाणि सेफालिआगुच्छआणि पेक्खदु दाव भवं। [इमानपचितकुसुमान् शेफालिकागुच्छान् प्रेक्षतां तावद् भवान्।]

**राजा**-अहो! विचित्रता कुसुमस्य, वसन्तक!

**वासवदत्ता**-(आत्मगतम्) वसन्तअसङ्कित्तणेण अहं पुण आणामि उज्जइणीए वत्तामि त्ति। [वसन्तकसङ्कीर्तनेनाहं पुनर्जानामि उज्जयिन्यां वर्त इति।]

**राजा**-वसन्तक! अस्मिन्नेवासीनौ शिलातले पद्मावतीं प्रतीक्षिष्यावहे।

**विदूषकः**-भो! तह। (उपविश्योत्थाय) ही! ही! सरअकालतिक्खो दुस्सहो आदवो। ता इमं दाव माहवीमण्डवं पविसामी। [भोस्तथा। ही! ही! शरत्कालतीक्ष्णो दुस्सह आतपः। तदिमं तावन्माधवीमण्डवं प्रविशावः।]

**राजा**-बाढम्। गच्छाग्रतः।

**विदूषकः**-एव्वं होदु। [एवं भवतु।]

(उभौ परिक्रामतः।)

**पद्मावती**-सवं आउलं कत्तुकामो अय्यवसन्तओ। किं दाणिं करेह्म? [सर्वमाकुलं कर्तुकाम आर्यवसन्तकः। किमिदानीं कुर्मः?]

**चेटी**-भट्टिदारिए! एदं महुअरपरिणिलीणं ओलम्बलवं ओधूय भट्टारं बारइस्सं। [भर्तृदारिके! एतां मधुकरपरिनिलीनामवलम्बलतामवधूय भर्तारं वारयिष्यामि।]

**पद्मावती**-एवं करेहि। [एवं कुरु।] (चेटी तथा करोति।)

**विदूषकः**-अविहा अविहा! चिट्ठदु चिट्ठदु दाव भवं। [अविह अविह, तिष्ठतु तिष्ठतु तावद् भवान्।]

**राजा**-किमर्थम्?

**विदूषकः**-दासीएपुत्तेहिं महुअरेहिं पीडिदो ह्मि। [दास्याः पुत्रैर्मधुकरैः पीडितोऽस्मि।]

**राजा**-मा मा भवानेवम्! मधुकरसन्त्रासः परिहार्यः।

**पश्य**-

**मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः।**
**पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः॥3॥**

तस्मादिहैवासिष्यावहे।

**अन्वयः**-मधुमदकला मदनार्ताभिः प्रियाभिः उपगूढा मधुकराः पादन्यासविषण्णा वयम् इव कान्तावियुक्ताः स्युः॥3॥

**विदूषकः**-एव्वं होदु। [ऐवं भवतु।]

(उभावुपविशतः।)

**चेटी**-भट्टिदारिए! रुद्धा खु ह्म वयं। [भर्तुदारिके! रुद्धाः खलु स्मो वयम्।]

**पद्मावती**-दिट्ठिआ उपविट्ठो अय्यउत्तो! [दिष्ट्योपविष्ट आर्यपुत्रः।]

**वासवदत्ता**-(आत्मगतम्) दिट्ठिआ पकिदित्थसरीरो अय्यउत्तो! [दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः।]

**चेटी**-भट्टिदारिए! सस्सुपादा खु अय्याए दिट्ठी। [भर्तृदारिके! साश्रुपाता खल्वार्याया दृष्टिः।]

**वासवदत्ता**-एषा महुअराणं खु अविणआदो कासकुसुमरेणुणा पडिदेण सोदआ मे दिट्ठी। [एषा खलु मधुकराणामविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः।]

**पद्मावती**-जुज्जई। [युज्यते।]

**विदूषकः**-भो! सुण्णं खु इदं पमदवणं। पुच्छिदव्वं किञ्चिअत्थि। पुच्छामि भवन्तं। [भोः! शून्यं खल्विदं प्रमदवनम्! प्रष्टव्यं किञ्चिदस्ति। पृच्छामि भवन्तम्।]

**राजा**–छन्दतः।

**विदूषकः**–का भवदो पिआ। तदाणिं तत्तहोदी वासवदत्ता, इदाणिं पदुमावती वा। [का भवतः प्रिया? तदानीं तत्र भवती वासवदत्ता इदानीं पद्मावती वा।]

**राजा**–किमिदानीं भवान् महति बहुमानसङ्कटे मां न्यस्यति?

**पद्मावती**–हला! जादिसे सङ्कटे निक्खित्तो अय्यउत्तो। [हला! यादृशे सङ्कटे निक्षिप्त आर्यपुत्रः।]

**वासवदत्ता**–(आत्मगतम्) अहं अ मन्दभाआ। [अहं च मन्दभागा।]

**विदूषकः**–सेरं सेरं भणादु भव। एक्का उवरदा, अवरा असण्णिहिदा। [स्वैरं स्वैरं भणतु भवान्। एकोपरता, अपरा असन्निहिता।]

**राजा**–वयस्य! न खलु बूयाम्। भवांस्तु मुखरः।

**पद्मावती**–एत्तएण भणिदं अय्यउत्तेण। [एतावता भणितमार्यपुत्रेण।]

**विदूषकः**–भो! सच्चेग सवामि, कस्स वि ण आचक्खिस्सं। एसा सन्दट्ठा मे जीहा। [भोः! सत्येन शपे, कस्मा अपि नाख्यास्ये। एषा सन्दष्टा मे जिह्वा।]

**राजा**–नोत्सहे सखे! वक्तुम्।

**पद्मावती**–अहो! इमस्स पुरोभाइदा। एत्ताएण हिअअं ण जाणादि। [अहो! अस्य पुरोभागिता। एतावता हृदयं न जानाति।]

**विदूषकः**–किं ण भणादि मम? अणाचक्खिअ इमादो सिलावट्टआदो ण सक्कं एक्कपदं वि गमिदुं! एसो रुद्धो अत्त भवं। [किं न भणति मम? अनाख्यायाऽस्माच्छिलापट्टकान्न शक्यमेकपदमपि गन्तुम्। एष रुद्धोऽत्र भवान्।]

**राजा**–किं बलात्कारेण?

**विदूषकः**–आम, बलक्कारेण। [आम्, बलात्कारेण।]

**राजा**–तेन हि पश्यामस्तावत्।

**विदूषकः**–पसीददु पसीददु भवं। वअस्सभावेण साविदो सि, जइ सच्चं ण भणासि। [प्रसीदतु प्रसीदतु भवान्। वयस्यभावेन शापितोऽसि, यदि सत्यं न भणसि।]

**राजा**–का गतिः। श्रूयताम्–

**पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।**
**वासवदत्ताबद्धं न तु तावन्मे मनो हरति॥4॥**

**अन्वयः**–रूपशीलमाधुर्यैः यद्यपि पद्मावती मम बहुमताः, तु वासवदत्ताबद्धं मे मनो न हरति तावत् इत्यन्वयः॥4॥

**वासवदत्ता**–(आत्मगतम्) भोदु भोदु। दिण्णं वेदणं इमस्स परिखेदस्य। अहो! अञ्आदवासं वि एत्थं बहुगुणं सम्पज्जइ। [भवतु भवतु। दत्तं वेतनमस्य परिखेदस्य। अहो! अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते।]

**चेटी**–भट्टिदारिए! अदक्खिणे खु भट्टा। [भर्तृदारिके! अदाक्षिण्यः खलु भर्ता।]

**पद्मावती**–हला! मा मा एव्वं! सदक्खिण्णो एव्व अय्यउत्तो, जो इदाणिं वि अय्याए वासवदत्ताए गुणाणि सुमरदि। [हला! मा मैवम्। सदाक्षिण्य एवार्यपुत्रः, य इदानीमप्यार्याया वासवदत्ताया गुणान् स्मरति।]

**वासवदत्ता**-भद्दे! अभिजणस्स सदिसं मन्तिदं। [भद्रे! अभिजनस्य सदृशं मन्त्रितम्।]

**राजा**-उक्तं मया। भवानिदानीं कथयतु। का भवतः प्रिया? तदा वासवदत्ता, इदानीं पद्मावती वा।

**पद्मावती**-अय्यउत्तो वि वसन्तओ संवुत्तो। [आर्यपुत्रोऽपि वसन्तकः संवृत्तः।]

**विदूषकः**-किं मे विप्पलविदेण। उभओ वि तत्तहोदीओ मे बहुमदाओ। [किं मे विप्रलपितेन। उभे अपि तत्रभवत्यौ मे बहुमते।]

**राजा**-वैधेय! मामेवं बलाच्छ्रुत्वा किमिदानीं नाभिभाषसे?

**विदूषकः**-किं मं पि बलक्कारेण? [कि मामपि बलात्कारेण?]

**राजा**-अथ किम्, बलात्कारेण।

**विदूषकः**-तेण हि ण सक्कं सोदुं। [तेन हि न शक्यं श्रोतुम्।]

**राजा**-प्रसीदतु प्रसीदतु महाब्राह्मण, स्वैरं स्वैरमभिधीयताम्।

**विदूषकः**-इदाणिं सुणादु भवं। तत्तहोदी वासवदत्ता मे बहुमदा। तत्तहोदी पदुमावदी तरुणी दस्सणीआ अकोवणा अणहङ्कारा महुरवाआ सदक्खिणा। अअं च अवरो महन्तो गुणो, सिणिद्धेण भोअणेण मं पच्चुग्गच्छइ वासवदत्ता-कहिं णु खु गदो अय्यवसन्तओ त्ति। [इदाणीं शृणोतु भवान्। तत्रभवती वासवदत्ता मे बहुमता। तत्रभवती पद्मावती तरुणी दर्शनीया अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या। अयं चापरो महान् गुणः, स्निग्धेन भोजनेन मां प्रत्युद्गच्छति वासवदत्ता-कुत्र नु खलु गत आर्यवसन्तक इति।]

**वासवदत्ता**-भोदु भोदु, वसन्तअ! सुमरेहि वाणिं एदं। [भवतु, भवतु, वसन्तक! स्मरेदानीमेतत्।]

**राजा**-भवतु भवतु वसन्तक! सर्वमेतत् कथयिष्ये देव्यै वासवदतायै।

**विदूषकः**-अविहा वासवदत्ता? कहिं वासवदत्ता? चिरा खु उवरदा वासवदत्ता। [अविहा वासवदत्ता? कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।]

**राजा**-(सविषादम्) एवम्? उपरता।

**अनेन परिहासेन व्याक्षिप्तं में मनस्त्वया।**
**ततो वाणी तथैवेयं पूर्वाभ्यासेन निःसृता॥5॥**

**अन्वयः**-अनेन परिहासेन मे मनः त्वया व्याक्षिप्तम्। तत इयं वाणी पूर्वाऽभ्यासेन तथा एव निःसृता॥5॥

### श्लोकार्थः

**4.1 संस्कृत-व्याख्या**- उदयनः विदूषकं प्रति स्व मनःस्थितिं कथयति— भो मित्र! पूर्वकाले यदा अहम् काष्ठनिर्मितेन हस्तियंत्रेण निगह्य तस्य प्रद्योतस्य सचिवेन उज्जयिनीयम् नीतः। तदानीम् वासवदत्ताम् वीणा-शिक्षण-समये स्वैरम् अहम् अतीव काम सन्तप्तावस्थाम् प्राप्तवान्। तदा एतत् प्रतीयते स्म यत् कामदेवेन स्व पञ्चसंख्याकाः बाणाः ममोपरि सहैव (संयुक्तीकृत्य वा) प्रापातिताः। तस्मात् कालात् एक मम हृदयम् क्षतम्। इदानीं तु पद्मावतीम् अभिलक्ष्य तत् हृदयम् पुनः कामासक्तं सञ्जातम्। मदनः तु पञ्चवाणयुक्तः एव प्रसिद्धो वर्तते। अतः एषः षट् संख्यकः वाणः तेन कस्मात् प्रक्षिप्तः? इत्यस्मिन् विषये अतीव विस्मितोऽस्मि।

**4.2 संस्कृत-व्याख्या** - उदयनःआकाशे सारसपंक्तिं दृष्ट्वाविदूषकं प्रतिकथयति— सरलां, विस्तृतां सावकाशां उच्चावाचां, तिर्यक्, परिवर्तनेषु सप्तर्षितारकगणवत् कुटिलां एनां सारसपंक्तिं सद्यः कञ्चकहीनस्य सर्पस्य उदरं इव निर्मलस्य आकाशतलस्य विभज्यमानां मर्यादारेखां इव पश्यामि।

**4.3 संस्कृत-व्याख्या**– माधवीलतामण्डले प्रविश्य भ्रमरा: न पीडनीया: इति वदन् उदयन: कथयति— एते पुष्पपरागपानेन मत्ता: भ्रमरा: कामासक्ताभि: स्व-स्वप्रियाभि: आलिङ्गनबद्धा: सन्ति, अनेन एते अतीव आनन्दं अनुभवन्ति। अस्कमाकं अन्त: प्रवेशने इमें भयभीता: भविष्यन्ति, तेन एतेषाम् सर्वेषाम् स्वकान्ताभि: सह विभोग: भविष्यति। तत् समुचितं न स्यात्। अत: बहिर्भागे एव उपविशाम: इति भाव:।

**4.4 संस्कृतव्याख्या**– उदयन: विदूषकं प्रति कथयति– हे वयस्य! यद्यपि सौन्दर्येण, सदाचारेण, मधुरभाषणेन च पद्मावती मे अत्यादृता वर्तते। पुनरपि मम मन: वासवदत्तायां पूर्णरूपेण आसक्तं अस्ति। तत् मानसं एषा पद्मावती तस्मात् स्थानात् हर्तुं न शक्नोति।

**4.5 संस्कृत-व्याख्या—** उदयन: वसन्तकं प्रति कथयति—अनेन पूर्वोक्तपरिहासवचनेन मम मन: त्वया व्याकुलीकृतम्। अनेनैव कारणेन प्राक्कालिकसंस्कारवशात् ईदृशी वाक् निर्गता मम मुखात्।

## अभ्यास:

**प्रश्न–1. एकपदेनोत्तरत–**

(1) क: काल: त्वामन्विष्यामि? का कथयति?
(2) अपि स्नातो जामाता? कं पृच्छति चेटी?
(3) सुमनोवर्णकं किम्?
(4) कुक्षिपरिवर्त: कस्य संवृत्त:?
(5) प्रमदवनम् का आगता?
(6) प्रमदवनागमनस्य प्रयोजनं किम्?
(7) यावदहमपि कुसुमावचयं करोमि? पुष्पावचयं का कर्तुमिच्छति?
(8) आर्यपुत्रेण विना का उत्कठिता?
(9) यद्यल्प: स्नेह: सा स्वजनं कथं परित्यजति?
(10) सारसपक्तिं राजानं क: दर्शयति?
(11) तव कारणादार्यपुत्रदर्शनं परिहरामि? 'तव' कस्यै प्रयुक्त:?
(12) शिलातले कौ आसीनौ पद्मावती प्रतीक्षेते?
(13) प्रष्टव्यं किञ्चिदस्ति–केन कथितम्?
(14) रूपशीलमाधुर्यै: का बहुमता?
(15) अज्ञातवासोऽपि बहुगुण: सम्पद्यते कया कथितम्

**प्रश्न–2. एकवाक्येनोत्तरत–**

(1) 'तत्र भवती वासवदत्ता मे बहुमता किं कारणं प्रदर्शयति विदूषक:?
(2) 'सर्वमेतद् कथयिष्ये देव्यै वासवदत्तायै' केन कथं कथितम्?
(3) उभे अपि तत्रभवत्यौ मे प्रिये। भवत्यौ पदस्य कोऽर्थ:
(4) मधुकाराणां विशेषणानि कानि मधुवनकला मधुकरा:........... इति श्लोकानुसारं लिखत।
(5) विदूषक: माधवीमण्डलपप्रवेशाय किं कारणं दर्शयति?
(6) पद्मावती कुत्रगता सम्भाव्यते विदूषकस्य विचारेण?

**प्रश्न–3. अधोलिखितपदानां प्रकृतिप्रत्ययां पृथक्-पृथक् लिखत–**

| | **पदानि** | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|---|
| (1) | तूष्णीकः | ...................... | ...................... |
| (2) | उत्कठिता | ...................... | ...................... |
| (3) | पश्यतु | ...................... | ...................... |
| (4) | वारयसि | ...................... | ...................... |
| (5) | शोभते | ...................... | ...................... |
| (6) | जानन्ति | ...................... | ...................... |
| (7) | आकृष्टम् | ...................... | ...................... |
| (8) | व्याक्षिप्तम् | ...................... | ...................... |
| (9) | उपरता | ...................... | ...................... |
| (10) | विश्वस्ता | ...................... | ...................... |
| (11) | विमुच्य | ...................... | ...................... |

**प्रश्न–4. अधोलिखितानां समासविग्रहाणां समक्षं समस्तपदं समासनाम च लिखत–**

| | **विग्रहः** | **समस्तपदम्** | **समासनाम** |
|---|---|---|---|
| (1) | कान्तया वियुक्ताः | .................... | .................... |
| (2) | न ज्ञातः | .................... | .................... |
| (3) | बहुगुणो यस्य सः | .................... | .................... |
| (4) | न कोपना | .................... | .................... |
| (5) | मधुरा वाचा यस्य सः | .................... | .................... |
| (6) | अविद्यमानः अहंकारः यस्य सः | .................... | .................... |
| (7) | पूर्वः स चासौ अभ्यासः तेन | .................... | .................... |
| (8) | महांश्चासौ ब्राह्मणः। | .................... | .................... |

**प्रन–5. कोष्ठके अंकितैः शब्दैः उचितशब्देन रिक्तस्थानं पूरयत–**

**[ अचिरात्, माम्, हि भवान्, क्लिन्नम् ]**

(1) इदानीं शृणोतु ......................।

(2) ..................खलूपरता वासवदत्ता।

(3) अश्रुपात.................. भवतोमुखम्।

(4) स्निग्धेन भोजनेन..................प्रत्युद्गच्छति।

(5) अनतिक्रमणीयो.............. विधिः

**प्रश्न-6. श्लोकात् समुचितं पदं चित्वा अन्वये रिक्तस्थानानि पूरयत।**

अनेन............ मे.......... त्वया व्याक्षिप्तम्। तत ........... वाणी पूर्वाम्यासेन.............. निस्सृता।

**प्रश्न-7. माधवीमण्डपे उदयनवसन्तकयोः मध्ये कृतवार्तालापः स्वसंस्कृतभाषां लिखत।**

## योग्यताविस्तारः

### अग्निपुराणे अष्टत्रिंशत्तमे-अध्याये नाटकनिरूपणम्

नाटकं सप्रकरणं डिम ईहामृगोऽपि वा।
ज्ञेयः समवकारश्च भवेत् प्रहसनं तथा॥1॥

व्यायोगभाणवीथ्यङ्कत्रोटकान्यथ नाटिका।
सट्टकं शिल्पकः कर्णा एको दुर्मल्लिका तथा॥2॥

प्रस्थानं भाणिका भाणी गोष्ठी हल्लीशकानि च।
काव्यं श्रीगदितं नाट्यरासकं रासकं तथा॥3॥

उल्लाप्यकं प्रेङ्क्षणञ्च सप्तविंशतिरेव तत्।
सामान्यञ्च विशेषञ्च लक्षणस्य द्वयी गतिः॥4॥

सामान्यं सर्वविषयं शेषः क्वापि प्रवर्त्तते।
पूर्वरङ्गे निवृते तु देशकालावुभावपि॥5॥

रसभावविभावानुभावा अभिनयास्तथा।
अङ्कस्थितिञ्च सामान्यं सर्वत्रैवोपसर्पणात्॥6॥

विशेषोऽवसरे वाच्यः सामान्यं पूर्वमुच्यते।
त्रिवर्गसाधनं नाट्यमित्याहु करणञ्च तत्॥7॥

इतिकर्त्तव्यता तस्य पूर्वरङ्गो यथाविधि।
नान्दीमुखानि द्वात्रिंशदङ्गानि पूर्वरङ्गके॥8॥

देवतानां नमस्कारो गुरूणामपि च स्तुतिः।
गोब्राह्मणनृपादीनामाशीर्वादादि गीयते॥9॥

नान्द्यन्ते सूत्रधारोऽसौ रूपकेषु निबध्यते।
गुरुपूर्वक्रमं वंशप्रशंसा पौरुषं कवेः॥10॥

सम्बन्धार्थौ च काव्यस्य पञ्चैतानेष निर्दिशेत्।
नटो विदूषको वापि पारिपार्श्विक एव वा॥11॥

सहिताः सूत्रधारेण संलापं यत्र कुर्वते।
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः॥12॥

आमुखं तत् तु विज्ञेयं बुधैः प्रस्तावनापि सा।
प्रवृत्तकं कथोद्घातः प्रयोगातिशयस्तथा॥13॥

## चतुर्थेऽङ्के द्वितीयःउपक्रमः

**पद्मावती**-रमणीओ खु कहाजोओ णिसंसेण विसंवादिओ। [रमणीयः खलु कथायोगो नृशंसेन विसंवादितः।]

**वासवदत्ता**-(आत्मगतम्) भोदु भोदु, विस्सत्थह्मि। अदो। पिअं णाम, ईदिसं बअणं अप्पच्चदखं सुणीअदि। [भवतु भवतु, विश्वस्तास्मि। अहो! प्रियं नाम, ईदृशं वचनमप्रत्यक्षं श्रूयते।]

**विदूषकः**-धारेदु धारेदु भवं। अणदिवकमणीओ हि विही। ईदिसं दाणिं एवं। [धारयतु धारयतु भवान्। अनतिक्रमणीयो हि विधिः। ईदृशमिदानीमेतत्।]

**राजा**-वयस्य! जानाति भवानवस्थाम्। कुतः।

**दुःखं त्यक्तुं बद्धमूलोऽनुरागः स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।**
**यात्रा त्वेषा यद् विमुच्येह बाष्पं प्राप्ताऽऽनृण्या याति बुद्धिः प्रसादम्॥6॥**

**अन्वयः**-बद्धमूलः अनुरागः त्यक्तुं दुःखम्। स्मृत्वा स्मृत्वा दुःखं नवत्वं याति तु एषा यात्रा यत् इह बाष्पं विमुच्य बुद्धिः प्राप्तानृण्या (सती) प्रसादं याति।

**विदूषकः**-अस्सुपादकिलिण्णं खु तत्तहोदो मुहं। जाव मुहोदअं आणेमि। (निष्क्रान्तः।) [अश्रुपातक्लिन्नं खलु तत्रभवतो मुखम्। यावन्मुखोदकमानयामि।]

**पद्मावती**-अय्ये! बप्फाउलपडन्तरिदं अय्यउतस्य मुहं। जाव णिक्कमह्म।[आर्ये! बाष्पाकुलपटान्तरितमार्यपुत्रस्य मुखम्। यावन्निष्क्रामामः।]

**वासवदत्ता**-एव्वं होदु। अहव चिट्ठ तुवं। उक्कण्ठिवं भत्तारं उज्झिअ श्रजुत्तं णिग्गमणं। अहं एव्व गमिससं। [एवं भवतु। अथवा तिष्ठ त्वम्। उत्कण्ठितं भर्तारमुज्झित्वाऽयुक्तं निर्गमनम्। अहमेव गमिष्यामि।]

**चेटी**-सुट्ठु अय्या भणादि। उवसप्पदु दाव भट्टिदारिआ। [सुष्ठ्वार्या भणति। उपसर्पतु तावद् भर्तृदारिका।]

**पद्मावती**-किं णु खु पविसामि? [किन्नु खलु प्रविशामि?]

**वासवदत्ता**-हला! पविस! (इत्युक्त्वा निष्क्रान्ता।) [हला प्रविश।]

**विदूषकः**-(नलिनीपत्रेण जलं गृहीत्वा।) एसा तत्तहोदी पदुमावदी। [एषा तत्रभवती पद्मावती!]

**पद्मावती**-अय्य! वसन्तअ! किं एवं? [आर्य! वसन्तक! किमेतत्?]

**विदूषकः**-एवं इदं। इदं एवं। [एतदिदम्। इदमेतद्।]

**पद्मावती**-भणादु भणादु अय्यो भणादु। [भणतु भणत्वार्या भणतु।]

**विदूषकः**-भोदि! वादणीदेण कासकुसुमरेणुणा अक्खिणिपडिदेण सस्सुपादं खु तत्तहोदो मुहं। ता गह्णदु होदी इदं मुहोदअं। [भवति! वातनीतेन काशकुसुमरेणुनाऽक्षिनिपतितेन साश्रुपातं खलु तत्रभवतो मुखम्। तद् गृह्णादु भवतीदं मुखोदकम्।]

**पद्मावती**-(आत्मगतम्) अहो! सदक्खिण्णस्स जणस्स परिजणो विसदक्खिणो एव्व होदि। (उपेत्य) जेदु अय्यसत्तो। इदं मुहोदअं। [अहो सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति। जयत्वार्यपुत्रः। इदं मुखोदकम्।]

**राजा**-अये! पद्मावती? (अपवार्य) आर्य वसन्तक! किमिदम्?

**विदूषकः**-(कर्णे) एव्वं विअ। [एवमिव।]

**राजा**-साधु वसन्तक! साधु। (आचम्य) पद्मावति। आस्यताम्।

**पद्मावती**-जं अय्यउत्तो आणवेदि। (उपविशति।) [यदार्यपुत्र आज्ञापयति।]

**राजा**-पद्मावति।

**शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि।**
**काशपुष्पलवेनेदं साश्रुपातं मुखं मम॥7॥**

**अन्वयः**-हे भामिनि! शरच्छशाङ्कगौरेण वाताविद्धेन काशपुष्पलवेन इदं मम मुखं साऽश्रुपातम्॥7॥

(आत्मगतम्)

**इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।**
**कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः॥8॥**

**अन्वयः**-नवोद्वाहा इयं बाला सत्यं श्रुत्वा व्यथां व्रजेत्। इयं कामं धीरस्वभावा, तु स्त्रीस्वभावः कातरः।

**विदूषकः**-उइदं तत्तहोदी मअधराअस्स अवरह्णकाले भवन्तं अग्गदो करिअ सुहिज्जणदंसणं। सक्कारो हि णाम सक्कारेण पडिच्छिदो पीदिं उप्पादेदि। ता उट्ठदु दाव भवं। [उचितं तत्रभवती मगधराजस्यापराह्णकाले भवन्तमग्रतः कृत्वा सुहृज्जनदर्शनम्। सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति। तदुतिष्ठतु तावद् भवान्।]

**राजा**-बाढम्। प्रथमः कल्पः। (उत्थाय)

**गुणानां वा विशालानां सत्काराणां च नित्यशः।**
**कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः॥9॥**

**अन्वयः**-लोके विशालानां गुणानां सत्काराणां च कर्तारो नित्यशः सुलभाः, तु विज्ञातारो दुर्लभाः।

(निष्क्रान्ताः सर्वे।)

**।। इति चतुर्थोऽङ्कः ।।**

## श्लोकार्थः

**4.6 संस्कृत-व्याख्या**- जानासि। प्रगाढ़ानुरागः विस्मर्तुं अतिकठिनम्, तत् प्रेम भूयो भूयः संस्मृत्य नूतनतां प्राप्नोति। लोकरीतिः तु एषा दृश्यते यत् अस्मिन् संसारे प्रियं प्रति अश्रूणि विमुच्य बुद्धिः आनृण्यं अनुभवति, चेतः प्रसादं च अधिगच्छति। प्रियस्य जनस्य वियोगे रोदनं कृत्वा मनः परमां शान्तिं आप्नोति, इति भावः।

**4.7 संस्कृत-व्याख्या—** उदयनःपद्मावतीं प्रति कथयति— हे सुन्दरि! वायुना परिचालितेन शरच्चन्द्रसदृसधलवर्णयुक्तेन काशस्य पुष्परागकणेन मम अक्षिपातेन मुखं इदं अश्रुयुक्तं वर्तते, नान्यत् कारणं, अतः चिन्ता न कार्या।

**4.8 संस्कृत-व्याख्या—** राजा उदयनः मनसि विचारयति, यदि अस्याः पद्मावत्याः समक्षे अश्रुमोचनस्य यथार्थकारणं कथयिष्यामि, तर्हि एषा अवश्यमेव अतीव पीड़ां अनुभविष्यति। कुतः इयं सद्यं प्रणीता, अल्पवयोयुक्ता वर्तते। कट्वनुभवशून्या एषा यद्यपि प्रकृत्या धीरा अस्ति, तथापि नारीणां प्रकृतिः स्वभावतः अधीराः भवति। अतः सत्यं श्रुत्वा एषा सोढुं न शक्या इति भावः।

**4.9 संस्कृत-व्याख्या—** राजाउदयनः विदूषकस्यकथनस्यपरिपोषं कुर्वन् कथयति— अस्मिन् संसारे एतादृशाः

बहवः जनाः सन्ति, ये निःस्वार्थभावेन अन्येषां उपकारं कुर्वन्ति, स्वागतं, सम्मानं कुर्वन्ति। दया-दाक्षिण्यगुण-संयुक्ताः ते सदैव अन्येषां उपकारकार्येषु एव संलग्ना भवन्ति, किन्तु तेषां उपकारकाणां विज्ञातारः, स्वीकर्तारः तु दुर्लभाः एव सन्ति। वस्तुतः परगुणग्राहिणः परकृतसत्कारज्ञाः दुःखेन लब्धुं शक्याः, इति भावः।

**अभ्यासः**

**प्रश्न-1. एकपदेनोत्तरत-**

(1) अश्रुपातक्लिन्नं भवतो मुखम् भवतः पदेन कः कथ्यते?

(2) 'अहमेव गमिष्यामि' 'अहम्' का?

(3) नलिनीपत्रेण जलं कः गृह्णाति?

(4) तद्गृहणाति भवतीदं मुखोदकम् कः कथयति?

(5) 'काशपुष्पलवेनेदं साश्रुपातं मुखं मम केन कथितम्?

(6) कामं धीर स्वमावेयं स्त्रीस्वभावस्तु कातर कस्यायमात्मगतः विचारः?

(7) सत्कारोहि नाम सत्कारेण प्रतीष्टं प्रीतिमुत्पादयति? कः कथयति?

(8) अहो प्रियोनामवचनम् ईदृशं अप्रत्यक्षं श्रूयते कया कथितम्।

(9) स्मृत्वा-स्मृत्वा कीदृशं दुःखं नवत्वं याति।

**प्रश्न-2. एकेन वाक्येनोत्तरत-**

(1) स्त्रीस्वभावः कीदृशः भवति?

(2) मुखप्रक्षालनायोदयनं जलं कयादत्तम्?

(3) मुखोदकं केन कस्यकृते आनीतम्?

(4) कमग्रतः कृत्वा सत्कार कार्यक्रमः आयोजितः?

(5) कस्य विज्ञातारः दुर्लभाः?

**प्रश्न-5. उचितं युग्ममेलनं कुरुत-**

| 'क' | | 'ख' |
|---|---|---|
| वाताविद्धेन | - | पद्मावति |
| धीरस्वभावा | - | विदूषकः |
| वसन्तकः | - | साश्रुपातम् |
| भामिनि | - | पद्मावती |

**प्रश्न-6. अधोलिखितानि विशेषणपदानि विशेष्येन सह योजयत।**

| | | |
|---|---|---|
| नवोद्वाहा | - | मुखम् |
| साश्रुपतम् | - | भर्तारम् |
| उत्कण्ठितम् | - | वचनम् |
| अप्रत्यक्षम् | - | परिहासेन |
| अनेन | - | बाला |

**प्रश्न-7. अधोलिखितानां पदानां प्रकृतिप्रत्ययां पृथक्-पृथक् लिखत-**

| | पदानि | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (1) | अनेन | ...................... | ...................... |
| (2) | व्याक्षिप्तम् | ...................... | ...................... |
| (3) | निः सृता | ...................... | ...................... |
| (4) | विश्वस्ता | ...................... | ...................... |
| (5) | क्लिन्नम् | ...................... | ...................... |
| (6) | विमुच्य | ...................... | ...................... |
| (7) | निष्क्रमामः | ...................... | ...................... |

(8) जयतु

(9) उपसर्पतु

(10) भामिनि

**प्रश्न-8. अधोलिखितानां समस्तपदानां विग्रहः समासनाम च लिखत-**

| | समस्त पदान | विग्रहः | समासनाम |
|---|---|---|---|
| (1) | प्राप्ताऽनृण्या | ...................... | ...................... |
| (2) | अश्रुपातः | ...................... | ...................... |
| (3) | अश्रुपातक्लिन्नम् | ...................... | ...................... |
| (4) | वाष्पाकुलः | ...................... | ...................... |
| (5) | वाप्पाकुलपटः | ...................... | ...................... |
| (6) | काशकुसुमरेणु | ...................... | ...................... |
| (7) | नवोद्वाहा | ...................... | ...................... |
| (8) | काशकुसुमम् | ...................... | ...................... |
| (9) | धीरस्वभावा | ...................... | ...................... |
| (10) | सुहृज्जनाः | ...................... | ...................... |

**प्रश्न-9. अधोलिखितस्य श्लोकान्वयस्य रिक्तस्थानानि पूरयत-**

लोके ............... गुणानां सत्काराणां............. कर्तारः।

नित्यशः.................... विज्ञातरः.......................... ॥

## योग्यता-विस्तारः

## अग्निपुराणे अष्टत्रिशततमे अध्याये नाटकनिरूपणम्

आमुखस्य त्रयो भेदो वीजांशेषूपजायते।
कालं प्रवृत्तमाश्रित्य सूत्रधृग् यत्र वर्णयेत्॥14॥

तदाश्रयञ्च पात्रस्य प्रवेशस्तत् प्रवृत्तकम्।
सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा॥15॥

गृहीत्वा प्रविशेत् पात्रं कथोद्घातः स उच्यते।
प्रयोगेषु प्रयोगन्तु सूत्रधृग् यत्र वर्णयेत्॥16॥

ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः।
शरीरं नाटकादीनामितिवृत्तं प्रचक्षते॥17॥

सिद्धमुत्प्रेक्षितञ्चेति तस्य भेदावुभौ स्मृतौ।
सिद्धमागमदृष्टञ्च सृष्टमुत्प्रेक्षितं कवेः॥18॥

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च।
अर्थप्रकृतयः पञ्च पञ्च चेष्टा अपि क्रमात्॥19॥

प्रारम्भश्च प्रयत्नश्च प्राप्तिः सद्भाव एव च।
नियता च फलप्राप्तिः फलयोगश्च पञ्चमः॥20॥

मुखं प्रतिमुखं गर्भो विमर्शश्च तथैव च।
तथा निर्वहणञ्चेति क्रमात्पञ्चैव संधयः॥21॥

❖ ❖ ★ ❖ ❖

॥श्री॥

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तम्

# पञ्चमोऽङ्कः

**पूर्व पीठिका**

**पूर्वाङ्के उदयनस्य द्वितीयः परिणयः पद्मावत्या सह अभवत्। तथापि वासवदत्तास्मरणं जनितमनः स्थिति। यादृशी उदयनस्य बद्धमूलोरागः स्मृत्वा स्मृत्वा नवदु:खम् याति।**

**तदनन्तरं विदूषकः-कथयति-अश्रुपातक्लिन्नं तत्रभवतः मुखम्। तत्प्रक्षालनार्थं मुखोदकमानयामि इत्थं निष्क्रान्ते विदूषके पद्मावती वासवदत्ता कथयति आर्ये! वाष्पाकुलपटान्तरितम् आर्यपुत्रस्य मुखम् यावन्निष्क्रमावः। वासवदत्ता उत्कण्ठितं भर्तारं परित्यज्य अयुक्तं निर्गमनम्। अहमेव गमिष्यामि। तदैव जलं गृहीत्वा विदूषकः प्रविशति। पद्मावती पृच्छति। आर्य वसन्तक किमेतद्। विदूषकः कथयति कासकुसुमरेणुनाक्षिनिपातेन साश्रुपातं तत्रभवतः मुखम्। तद्गृह्णातु भवतीदं मुखोदकम्। राजा जलेन मुखं प्रक्षाल्य आस्यताम् पद्मावति इति कथितवान्। राजाश्रुपातस्य पूर्वोक्तं कारणमेव समर्थयति।**

**''शरच्छशांकगौरेण वाताविद्धेन भामिनि।**
**काशपुष्पलवेनेदं साश्रुपातं मुखं मम॥**

(ततः प्रविशति पद्मिनिका।)

**पद्मिनिका**—महुअरिए! महुअरिए! आअच्छ दाव सिग्घं। [मधुकरिके आगच्छ तावच्छीघ्रम्।]

(प्रविश्य)

**मधुकरिका**-हला! इअह्मि। किं करीअदु? [हला! इयमस्मि। किं क्रियताम्?]

**पद्मिनिका**-हला! किं ण जाणासि तुवं-भट्टिदारिआ पदुमावदी सीर्षवेदणाए दुक्खाविदेत्ति। [हला! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दु:खितेति।]

**मधुकरिका**-हद्धि। [हा धिक्।]

**पद्मिनिका**-हला! गच्छ सिग्धं, अय्य अवन्तिअं सद्दावेहि। केवलं भट्टिदारिआए सीसवेदणं। एव्व णिवेदेहि। तदो सअं एव्व आगमिस्सदि। [हला! गच्छ शीघ्रम्, आर्यामवन्तिकां शब्दायस्व। केवलं भर्तृदारिकाया: शीर्षवेदनामेव निवेदय। ततः स्वयमेवागमिष्यति।]

**मधुकरिका**-हला! किं सा करिस्सदि? [हला किं सा करिष्यति?]

**पद्मिनिका**–सा खु दाणिं महुराहि कहाहि भट्टिदारिआए सीसवेदणं विणोदेति। [सा खल्विदानीं मधुराभिः कयाभिर्मर्तृदारिकायाः शीर्षवेदनां विनोदयति।]

**मधुकरिका**–जुज्जइ। कहिं सअणीअं रइदं भट्टिदारिआए? [युज्यते। कुत्र शयनीयं रचितं भर्तृदारिकायाः?]

**पद्मिनिका**–समुद्दगिहिके किल सेज्जा त्थिण्णा। गच्छ दाणिं तुवं अहं वि भट्टिणो णिवेदणत्थं अय्यवसन्तअ अण्णेसामि। [समुद्रगृहके किल शय्यास्तीर्णा। गच्छेदानीं त्वम्। अहमपि भर्तुर्निवेदनार्थमार्यवसन्तकमन्विष्यामि।]

**मधुकरिका**–एव्वं होदु। (निष्क्रान्ता) [एवं भवतु।]

**पद्मिनिका**–कहिं दाणिं अय्यवसन्तअं पेक्खामि? [कुत्रेदानीमार्यवसन्तकं पश्यामि?]

(ततः प्रविशति विदूषकः।)

**विदूषकः**–अज्ज खु देवीविओअविहुरहिअअस्स तत्तहोदो वच्छराअस्स पदुमावदीपाणिग्गहणसमौरिअस्स अच्चन्तसुहावहे मङ्गलोसवे मदणग्गिदाहो अहिंअदरं वड्ढइ। (पद्मिनिकां विलोक्य) अयि! पदुमिणिआ? पदुमिणिए! किं इह वत्तादि? [अद्य खालु देवीवियोगविधुरहृदयस्य तत्रभवतो वत्सराजस्य पद्मावतीपाणिग्रहणसमीरितस्यात्सन्तसुखावहे मङ्गलोत्सवे मदनाग्निदाहोऽधिकतरं वर्धते। अयि! पद्मिनिके? पद्मिनिके! किमिह् वर्तते?]

**पद्मिनिका**–अय्य! वसन्तअ! किं ण जाणासि तुवं–भट्टिदारिआ पदुमावदी सीसवेदणाए दुःखाविदेत्ति। [आर्य! वसन्तक! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति।]

**विदूषकः**–भोदि! सच्चं? ण जाणामि। [भवति! सत्यं? न जानामि।]

**पद्मिनिका**–तेण हि भट्टिणो णिवेदेहि णं। जाव अहं वि सीसाणुलेवणं तुवारेमि। [तेन हि भर्त्रे निवेदयैनाम्। यावदहमपि शीर्षानुलेपनं त्वरयामि।]

**विदूषकः**–कहिं सअणीअं रइदं पदुमावदीए? [कुत्र शयनीयं रचितं पद्मावत्याः?]

**पद्मिनिका**–समुद्दगिहके किल सेज्जा त्थिण्णा। [समुद्रगृहके किल शय्या स्तीर्णा।]

**विदूषकः**–गच्छदु भोदी। जाव अहं वि तत्तहोदो णिवेदइस्सं। [गच्छतु भवती। यावदहमपि तत्रभवते निवेदयिष्यामि।]

(निष्क्रान्तौ)

प्रवेशकः।

(ततः प्रविशति राजा)

**राजा**–

**श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां**
**कालक्रमेण पुनरागतदारभारः।**
**लावाणके हुतवहेन हृताङ्गयष्टिं**
**तां पद्मिनीं हिमहतामिव चिन्तयामि॥1॥**

**अन्वयः**–कालक्रमेण पुनरागतदारभारः (अहम्) लावाणके हुतवहेन हृताऽङ्गयष्टिं श्लाघ्याम् अवन्तिनृपतेः सदृशीं तनूजां तां हिमहतां पद्मिनीम् इव चिन्तयामि॥1॥

**विदूषकः**–तुवरदु तुवरदु दाव भवं। [त्वरतां त्वरतां तावद् भवान्।]

**राजा**–किमर्थम्?

**विदूषकः**–तत्तहोदी पदुमावदी सीसवेदणाए दुक्खाविदा। [तत्रभवती पद्मावती शीर्षवेदनया दुःखिता।]

**राजा**–कैवमाह?

**विदूषकः**–पदमिणिआए कहिदं। [पद्मिनिकया कथितम्।]

**राजा**–भोः! कष्टम्,

**रूपश्रिया समुदितां गुणतश्च युक्तां**
**लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।**
**पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः**
**पद्मावतीमपि तथैव समर्थयामि॥2॥**

**अन्वयः**–रूपश्रिया समुदिता गुणतश्च युक्तां प्रियां लब्ध्वा अद्य मम शोको मन्द इव। पूर्वाऽभिघातसरुजः अनभूतदुःखः अपि पद्मावतीम् अपि तथैव समर्थयामि॥2॥

**अथ कस्मिन् प्रदेशे वर्तते पद्मावती?**

**विदूषकः**–समुद्दगिहके किल सेज्जा त्थिण्णा। [समुद्रगृहके किल शय्या स्तीर्णा।]

**राजा**–तेन हि तस्य मार्गमादेशय।

**विदूषकः**–एदु एदु भवं। [एत्वेतु भवान्।]

(उभौ परिक्रामतः)

**विदूषकः**–इदं समुद्दगिहकं। पविसदु भवं। [इदं समुद्रगृहकम्। प्रविशतु भवान्।]

**राजा**–पूर्व प्रविश।

**विदूषकः**–भो! तह। (प्रविश्य) अविहा! चिट्ठदु चिट्ठदु दाव भवं। [भोः! तथा। अविहा! तिष्ठतु तिष्ठतु तावद् भवान्।]

**राजा**–किमर्थम्?

**विदूषकः**–एसो खु दीपप्पभावसूइदरूवो वसुधातले परिवत्तमाणो अज्जं काओअरो। [एष खलु दीपप्रभावसूचितरूपो वसुधातले परिवर्तमानः अयं काकोदरः]

**राजा**–(प्रविश्यावलोक्य सस्मितम्) अहो सर्पव्यक्तिवैधेयस्य।

**ऋज्वायतां हि मुखतोरणलोलमालां**
**भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख! सर्पम्।**
**मन्दानिलेन निशि या परिवर्तमाना**
**किञ्चित् करोति भुजगस्य विचेष्टितानि॥3॥**

**अन्वयः**–हे मूर्ख! त्वम् ऋज्वायतां क्षितौ भ्रष्टां मुखतोरणलोलमालां सर्पम् अवगच्छसि। या निशि मन्दाऽनिलेन किञ्चित्परिवर्तमाना भुजगस्य विचेष्टितानि करोति॥3॥

**विदूषकः**–(निरूप्य) सुट्ठु भवं भणादि। ण हु अअं काओअरो। (प्रविश्यावलोक्य) तत्तहोदी पदुमावदी

इह आअच्छिअ णिग्गदा भवे। [सुष्ठु भवान् भणति। न खल्वयं काकोदरः। तत्रभवती पद्मावतीहागत्य निर्गता भवेत्।]

**राजा**-वयस्य! अनागतया भवितव्यम्।

**विदूषकः**-कहं भवं जाणादि? [कथं भवान् जानाति?]

**राजा**-किमत्र ज्ञेयम्? पश्य,

**शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा**
**न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।**
**रोगे दृष्टिविलोभनं जनयितं शोभा न काचित् कृता**
**प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति॥4॥**

**अन्वयः**-हि शय्या अवनता न, तथा आस्तृतसमा, व्याकुलप्रच्छदा न। अमलं शिरोपधानं शीर्षाऽभिघातौषधैः क्लिष्टं न। रोगे दृष्टिविलोभनं जनयितुं काचित् शोभा न कृता। प्राणी रुजा शयनं प्राप्य पुनः शीघ्रं स्वयं न मुञ्चति॥4॥

**विदूषकः**-तेण हि इमस्सि सय्याए मुहुत्तअं उवविसिअ तत्तहोदिं पडिवालेडु भवं। [तेन ह्यस्यां शय्यायां मुहूर्तकमुपविश्य तत्रभवतीं प्रतिपालयतु भवान्।]

**राजा**-बाढम्। (उपविश्य) वयस्य! निद्रां मां बाधते। कथ्यतां काचित् कथा।

**विदूषकः**-अहं कहइस्सं। हो त्ति करेदु अत्तभवं। [अहं कथयिष्यामि। हा इति करोत्वत्रभवान्।]

**राजा**-बाढम्।

**विदूषकः**-अत्थि णअरी उज्जइणी णाम। तहिं अहिअरमणीआणि उदअह्वाणाणि वत्तन्ति किल। [अस्ति नगर्युज्जयिनी नाम। तत्राधिकरमणीयान्युदक स्नानानि वर्तन्ते किल।]

**राजा**-कथमुज्जयिनी नाम?

**विदूषकः**-जइ अणभिप्पेदा एसा कहा, अण्णं कहइस्सं। [यद्यनभिप्रेतैषा कथा, अन्यां कथयिष्यामि।]

**राजा**-वयस्य! न खलु नाभिप्रेतैषा कथा। किन्तु।

**स्मराम्यवन्त्याधिपतेः सुतायाः प्रस्थानकाले स्वजनं स्मरन्त्याः।**
**बाष्पं प्रवृत्तं नयनान्तलग्नं स्नेहान्ममैवोरसि पातयन्त्याः॥5॥**

**अन्वयः**-प्रस्थानकाले स्वजनं स्मरन्त्याः स्नेहात् प्रवृत्तं नयनाऽन्तलग्नं बाष्पं मम एव उरसि पातयन्त्याः अवन्त्या अधिपतेः सुतायाः स्मरामि॥5॥

**अपि च,**

**बहुशोऽप्युपदेशेषु यथा मामीक्षमाणया।**
**हस्तेन स्रस्तकोणेन कृतमाकाशवादितम्॥6॥**

**अन्वयः**-उपदेशेषु अपि बहुशो माम् ईक्षमाणया यया स्रस्तकोणेन हस्तेन आकाशवादितं कृतम्॥5॥

**विदूषकः**-भोदु, अण्णं कहइस्सं। अत्थि णअरं बह्मदत्तं णाम। तहिं किल राजा कंपिल्लो णाम। [भवतु, अन्यां कथयिष्यामि। अस्ति नगरं ब्रह्मदत्तं नाम। तत्र किल राजा काम्पिल्यो नाम।]

**राजा**-किमिति किमिति?

**विदूषकः**-(पुनस्तदेव पठति।]

**राजा**-मूर्ख! राजा ब्रह्मदत्तः, नगरं काम्पिल्यमित्यभिधीयताम्।

**विदूषकः**-किं राआ बह्मदत्तो, णअरं कंपिल्लं? [किं राजा ब्रह्मदत्तः नगरं काम्पिल्यम्?]

**राजा**-एवमेतत्।

**विदूषकः**-तेण हि मुहुत्तअं पडिवालेदु भवं, जाव ओट्ठगअं करिस्सं। राजा बह्मदत्तो, णअरं कपिल्लं। (इति बहुशस्तदेव पठित्वा) इदाणिं सुणादु भवं। अयि! सुत्तो अत्तभवं? अदिसीदला इअं वेला। अत्तणो पावारअं गह्णिअ आअमिस्सं। (निष्क्रान्तः) [तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावदोष्ठगतं करिष्यामि। राजा ब्रह्मदत्तः, नगर काम्पिल्यम्। इदानीं शृणोतु भवान्। अयि! सुप्तोऽत्रभवान्? अतिशीतलेयं वेला। आत्मनः प्रावारकं गृहीत्वागमिष्यामि।]

(ततः प्रविशति वासवदत्ता आवन्तिकावेषेण, चेटी च।)

**चेटी**-एदु एदु अय्या। दिढं खु भट्टिदारिआ सीसवेदणाए दुक्खाविदा। [एत्वेत्वार्या। दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता।]

**वासवदत्ता**-हद्धि, कहिं सअणीअं रइदं पदुमावदीए? [हा धिक्! कुत्र शयनीयं रचितं पद्मावत्याः?]

**चेटी**-समुद्दगिहके किल सेज्जा त्यिण्णा। [समुद्रगृहके किल शय्या स्तीर्णा।]

**वासवदत्ता**-तेण हि अग्गदो याहि। [तेन ह्यग्रतो याहि।]

(उभे परिक्रामतः।)

**चेटी**-इदं समुद्दगिहकं। पविसदु अय्या। जाव अहं वि सीसाणुलेवणं तुवारेमि। (निष्क्रान्ता।) [इदं समुद्रगृहकम्। प्रविशत्वार्या। यावदहमपि शीर्षानुलेपनं त्वरयामि।]

**वासवदत्ता**-अहो! अकरुणा खु इस्सरा मे। विरहपय्युससुअस्स अय्यउत्तस्य विस्समत्थाणभूदा इअं वि णाम पदुमावदी अस्सत्था जादा। जाव पविसामि (प्रविश्यावलोक्य) अहो! परिजणस्य पमादो। अस्सत्यं पदुमावदिं केवल दीव अहाअं करिअ परित्तजदि। इअं पदुमावदी ओसुत्ता। जाव उवविसामि! अहव अञ्ञासणपरिग्गहेण अप्पो विअ सिणेहो पडिभादि। ता इमस्सि सय्याए उवविसामि। (उपविश्य) किं णु हु एदाए सह उवविसन्तीए अज्ज पह्लादिदं विअ मे हिअअं। दिट्ठिआ अविच्छिण्णसुहणिस्सामा। णिव्वुत्तरोआए होदव्वं। अहव एथदेससंविभाअदाए सअणीअस्स सूएदि मे आलिङ्गेहि त्ति। जाव सइस्सं (शयनं नाटयति)। [अहो! अकरुणाः खल्वीश्वरा मे। विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रमस्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता। यावत् प्रविशामि। अहो! परिजनस्य प्रमादः। अस्वस्थां पद्मावतीं केवलदीपसहायां कृत्वा परित्यजति। इयं पद्मावत्यवसुप्ता। यावदुपविशामि। अथवान्यासनपरिग्रहेणाऽल्प इव स्नेहः प्रतिभाति। तदस्यां शय्यायामुपविशामि। किं नु खल्वेतया सहोपविशन्त्या अद्य प्रह्लादितमिव मे हृदयम्। दिष्ट्याऽविच्छिन्नमुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवैकदेशसंविभागतया शयनीयस्य सूचयति मामालिङ्गेति। यावच्छयिष्ये।]

**राजा**-(स्वप्नायते) हा वासवदत्ते!

**वासवदत्ता**-(सहसोत्थाय) हं! अय्यउत्तो, ण हु पदुमावदी? किं णु खु दिट्ठह्मि? महन्तो खु अय्यजोअन्धराअणस्स पडिण्णाहारो मम दंसणेण णिप्फलो संवुत्तो। [हम्! आर्यपुत्रः, न खलु पद्मावती? किन्नु खलु दृष्टास्मि? महान्! खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः।]

**राजा**-हा! अवन्तिराजपुत्रि!

**वासवदत्ता**-दिट्ठिआ सिविणाअदि खु अय्यउत्तो। ण एत्थ कोच्चि जणो। जाव मुहूत्तअं चिट्ठिअ दिट्ठिं हिअअं च तोसेमि। [दिष्ट्या स्वप्नायते खल्वार्यपुत्रः। नात्र कश्चिज्जनः। यावन्मुहूर्तक स्थित्वा दृष्टिं हृदयं च तोषयामि।]

**राजा**-हा! प्रिये! हा! प्रियशिष्ये! देहि मे प्रतिवचनम्।

**वासवदत्ता**-आलवामि भद्र! आलवामि। [आलपामि भर्तः! आलपामि]

**राजा**-किं कुपितासि?

**वासवदत्ता**-ण हि ण हि, दुक्खिदह्मि। [नहि, नहि, दुःखितास्मि।]

**राजा**-यद्यकुपिता, किमर्थ नालङ्कृतासि?

**वासवदत्ता**-इदो वरं किं? [इतः परं किम्?]

**राजा**-किं विरचिकां स्मरसि?

**वासवदत्ता**–(सरोषम्) आ अवेहि, इहावि विरचिआ? [आ अपेहि इहापि विरचिका?]

**राजा**-तेन हि विरचिकार्थ भवतीं प्रसादयामि। [हस्तौ प्रसारयति।]

**वासवदत्ता**-चिरं ठिदह्मि। को वि मं पेक्खे। ता गमिस्सं। अहव सय्यापलम्बिअं अय्यउत्तस्य हत्थं सअणीए आरोविअ गमिस्सं (तथा कृत्वा निष्क्रान्ता)। [चिरं स्थितास्मि। कोऽपि मां पश्येत्। तद् गमिष्यामि। अथवा शय्याप्रलम्बितमार्यपुत्रस्य हस्तं शयनीय आरोप्य गमिष्यामि।]

**राजा**-(सहसोत्थाय) वासवदत्ते! तिष्ठ तिष्ठ। हा! धिक्।

**निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।**
**ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः॥7॥**

**अन्वयः**-सम्भ्रमेण निष्क्रामन् अहं द्वारपक्षेण ताडितः, ततः अयं मनोरथो भूताऽर्थः (वा) इति व्यक्तं न जानामि॥7॥

(प्रविश्य)

**विदूषकः**-अइ! पडिबुद्धो अत्तभवं। [अयि! प्रतिबुद्धोऽवभवान्।]

**राजा**-वयस्य! प्रियमावेदये, धरते खलु वासवदत्ता।

**विदूषकः**-अविहा! वासवदत्ता? कहिं वासवदत्ता! चिरा खु उवरदा वासवदत्ता। [अविहा! वासवदत्ता? कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।]

**राजा**-वयस्य! मा मैवम्,

**शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।**
**दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता॥8॥**

**अन्वयः**-हे सखे! (वासवदत्ता) शय्यायाम् अवसुप्तं मां बोधयित्वा गता। ''दग्धा'' इति ब्रुवता रुमण्वता पूर्वं वञ्चितः अस्मि॥8॥

**विदूषकः**-अविहा! असम्भावणीअं दं ण। आ उदअह्लाणसङ्कितणेणतत्तहोदिं चिन्तअन्तेण सा सिविणे दिट्ठा

भवे। [अविहा! असम्भावनीयमेतन्न। आ! उदक्स्नानसङ्कीर्तनेन तत्रभवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।]

**राजा**-एवम्, मया स्वप्नो दृष्टः?

**यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।**
**अथायं विभ्रमो वा स्याद्, विभ्रमो ह्यस्तु मे चिरम्॥9॥**

**अन्वयः**-तावत् अयं स्वप्नो यदि? अप्रतिबोधन धन्यम्। अथवा अयं विभ्रमः स्यात्, चिरं मे विभ्रमः अस्तु हि॥9॥

**विदूषकः**-भो! वअस्स! एदस्सिं णअरे अवन्तिसुन्दरी णाम जक्खिणीपडिवसदि। सा तुए दिट्ठा भवे। [भो! वयस्य! एतस्मिन् नगरेऽवन्तिसुन्दरी नाम यक्षी प्रतिवसति। सा त्वया दृष्टा भवेत्।

**राजा**-न, न

**स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।**
**चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम्॥10॥**

**अन्वयः**-स्वप्नस्य अन्ते विबुद्धेन (मया) चारित्रम् अपि रक्षन्त्याः (वासवदत्तायाः) नेत्रविप्रोषिताऽञ्जनं दीर्घालकं मुखं दृष्टम्॥10॥

**अपि च वयस्य! पश्य पश्य,**

**योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः।**
**स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति॥11॥**

**अन्वयः**-संत्रस्तया तया देव्या यः अयं बाहुः निपीडितः। स्वप्ने उत्पन्नसंस्पर्शः (सन्) अपि रोमहर्षं न मुञ्चति॥11॥

**विदूषकः**-मा दाणिं भवं अणत्थं चिन्तिअ। एदु एदु भवं। चउस्सालंपविसामो। [मेदानीं भवाननर्थं चिन्तयित्वा। एत्वेतु भवान्। चतुःशालं प्रविशामः।]

(प्रविश्य)

**काञ्चुकीयः**-जयत्वार्यपुत्रः। अस्माकं महाराजो दर्शको भवन्तमाह एष खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदायेनोपयातः खल्वारुणिमभिघातयितुम्। तथा हस्त्यश्वरथपदातीनि मामकानि विजयाङ्गानि सन्नद्धानि। तदुत्तिष्ठतु भवान्।

**अपि च-**

**भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः**
**पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।**
**यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं**
**तीर्णा चापि बलैर्नदी त्रिपथगा, वत्साश्च हस्ते तव॥12॥**

**अन्वयः**-(हे राजन्!) ते रिपवो भिन्नाः। भवद्गुणरताः पौराः समाश्वासिताः। या पार्ष्णी, तस्या अपि भवत्प्रयाणसमये विधानं कृतम्। अरिप्रमाथजननं यद् यत् साध्यं, तत् तत् मया अनुष्ठितम्। बलैः त्रिपथगा नदी अपि तीर्णा च। वत्साश्च तव हसते (सन्ति)॥12॥

**राजा**-(उत्थाय) बाढम्। अयमिदानीम्,

**उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम्।**
**विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि॥13॥**

**अन्वयः**-नागेन्द्रतुरङ्गतीर्णे विकीर्णबाणोग्रतरङ्गभङ्गे महाऽर्णवाभे युधि उपेत्य दारुणकर्मदक्ष तम् आरुणि नाशयामि॥13॥

(निष्क्रान्ताः सर्वे)

**।। इति पञ्चमोऽङ्कः।।**

## श्लोकार्थः

**5.1 संस्कृत-व्याख्या**- राजा उदयनः अग्निदग्घां दिवंगतां वासवदत्तां स्मरति, कथयति च—समयचक्रेण पद्मावतीपरिग्रहरूपभारयुक्तः अहं लावाणके ग्रामे अग्नि दग्धतनुलतां, गुणगौरवात् प्रशंसनीयां अवन्तिराजस्य गुणानुरूपां तस्य पुत्रीं वासवदत्ताम् इदानीं तुषारेण हतां नाशितां कमलिनीं इव स्मरामि।

**5.2 संस्कृत-व्याख्या—** इदानीम् रूपशोभासम्पन्नां गुणगणसम्पन्नां प्रियतमां पद्मावतीं प्राप्य वासवदत्तायाः वियोगजन्य-मम विषादः किञ्चिद् न्यून इव सञ्जातः। किन्तु अनेन पद्मावतीशिरोवेदनारूपवृत्तान्तेन पूर्वभुक्तदु:खोऽहम् इदानीं स्वप्रियां नवोढां पद्मावतीं अपि वासवदत्तामिव विनाशगतां तर्कयामि।

**5.3 संस्कृत-व्याख्या—** विदूषकस्य सर्पविषयकां भ्रान्तिं दूरीकुर्वन् उदयनःकथयति— हे मूर्ख! सरला, दीर्घा भूमौ भ्रष्टा या पुष्पमाला मुख्यद्वारे स्थिता आसीत्। केनापि कारणेन सा चञ्चला माला भूमौ भ्रष्टा। मन्दपवनेन परितः स्पन्दमानां तां एव दृष्ट्वा त्वं सर्पं अवगच्छसि। कुतः एषा माला अनिलेन प्रेरिता भूत्वा सर्पवत् चेष्टां करोति। अनेनैव कारणेन त्वं प्रकाश-रहिते अस्मिन् काले एनां भ्रमवशसर्पं मन्यसे। वस्तुतः नायं सर्पः, माला वै एषा वर्तते। अतः अत्र भयस्य न किञ्चिदपि कारणं अस्ति।

**5.4 संस्कृत-व्याख्या—** शिरोवेदनायुक्ता पद्मावती अत्र समुद्रगृहे न आगता, इति प्रतिपादयन्, उदयनः कथयति—मित्र! दृश्यताम्, इयं शय्या समतलरूपेण दृश्यते, नैव कुत्रापि अवनता अस्ति भारेण। एवमेव अस्याः ऊपरि आस्तृतं आवरणं मनाक् अपि विषमतां न प्राप्तम्। शिरोपधानं अपि पूर्णतया स्वच्छं निर्मलं च वर्तते। अस्योपरि शिरोवेदनां दूरीकरणार्थं औषधिविशेषः न दृश्यन्ते। औषधिविशेषैः न दूषितं एतत् उपधानम् इति भावः। रोगिणः मनोरंजनार्थं अत्र किमपि चित्रकर्म न कृतं वर्तते। एतत् अतिरिक्तं महत्त्वपूर्णं इदमपि अस्ति यत् कोऽपि जनः रोगकारणेन शय्यां लब्ध्वा स्वयमेव शीघ्रं न जहाति।

**5.5 संस्कृत-व्याख्या—** राजा उदयनः विदूषकं प्रति कथयति—यदा अहं वासवदत्तां आदाय तस्याः पित्रोः अनुमतिं विना उज्जयिनीतः आगतवान् स्व राजधानीं रात्रिकाले, तदानीं स्वजनान् स्मरन्ती सा वासवदत्ता अतीव दु:खिता आसीत्। अतः मम वक्षस्थले स्वशरीरं संस्थाप्य मदीये वक्षसि अश्रूणि मुञ्चति स्म। तस्याः वासवदत्तायाः स्मरणं अहं इदानीं 'उज्जयिनी' शब्दस्य श्रवणेन करोमि।

**5.6 संस्कृत-व्याख्या—** उदयनः विदूषकं प्रति वासवदत्तायाः पूर्वकालिकचेष्टायाः कथं करोति—पूर्वकाले यदा उज्जयिनन्यां अहं तां वीणावादनस्य शिक्षां ददामि स्म। तदानीं सा अनेकशः माम् प्रेमपूर्णदृष्ट्या अवलोकयति स्म, तन्मयभावेन विलोकयन्त्या तस्याः हस्तात् वीणावादनस्य वस्तुविशेषः पृथिव्यां पतति स्म, किन्तु तदानीं अपि सा अनेकबारं शून्ये एव लयतालादिरहितं वादनं करोति स्म। वस्तुतः तस्याः प्रेम्णः एषा चरमावस्था आसीत् माम् प्रति।

**5.7 संस्कृत-व्याख्या—** वेगेन समुद्रगृहात् निर्गच्छन् अहं द्वारस्य पार्श्वभागेन आहतोऽभवम्। अनेन कारणेन एषा वासवदत्ता आसीत् न वा आसीत्, इति अवगन्तुं न शक्नोमि स्म। अनेनैव कारणेन वासवदत्ताया: करस्पर्श: यथार्थ: आसीत् किंवा मम मन:कल्पना एव आसीत्, इति व्यक्तं अवगन्तुं न शक्नोमि।

**5.8 संस्कृत-व्याख्या—** हे मित्र! वासवदत्ता वस्तुत: जीविता अस्ति, न मृता वर्तते। कुत: सा किञ्चद् कालपूर्वं अत्रैव आसीत्। तदानीम् अहं अवसुप्तवान्, सा माम् जागरयित्वा बहिर्भागे गता। पूर्वकाले रुमण्वान् द्वारा मां प्रति असत्यमेव भणितं आसीत्, यत् 'सा लावाणके अग्निकाण्डे दग्धा', इति वस्तुत: तेन रुमण्वता अहं प्रतारित: अस्मि।

**5.9 संस्कृत-व्याख्या—** उदयन: वसन्तकं प्रति कथयति—यदि मया एतत् स्वप्नं दृष्टं तर्हि सुखदायकं एतत् आसीत्, अत: मम जागरणं न भवेत्। चिरकालं यावत् एतत् स्वप्नं एव स्यात् इति भाव:। अथवा यदि वासवदत्ता-दर्शन-रूप एषा मम मन:भ्रान्ति: आसीत्, तर्हि मम बुद्धिभ्रम: अयम् दीर्घकालिक: भवतु। अहं तु अस्मिन् बुद्धिभमे एव शान्तिं आनन्दं च अनुभवामि।

**5.10 संस्कृत-व्याख्या—** स्वप्नस्य समाप्तौ पूर्णतयाजाग्रहदवस्थायां मया स्वचरित्रस्य रक्षायै प्रयत्नशीला प्राण-प्रिया वासवदत्ता दृष्टा। तस्या: मुखं कज्जलरहितं आसीत्। एवमेव दीर्घा: लम्बमाना: केशा: अपि वैव संस्कृता: आसन्, अपितु वियोगावस्थायां यादृशं भवितव्यं तथैव उन्मुक्तरूपेण अवलोकितम्।

**5.11 संस्कृत-व्याख्या—** उदयन: विदूषकं प्रति कथयति— हे मित्र! पश्य, मम जागरणं भविष्यति, अन्य: कोऽपि द्रक्ष्यति इति विचार्य तथा वासवदत्तया शय्यात: लम्बमानं मम करं स्वकरेण गृहीत: शय्यायां च निक्षिप्त: शनै: शनै: सत्या: संस्पर्शे करेऽस्मिन् रोमाञ्च: सञ्जात:, इदानीं अपि तं रोमाञ्चं न त्यजति। अत: निश्चयमेव सा वासवदत्ता आसीत्, न अन्या कापि यक्षिणी।

**5.12 संस्कृत-व्याख्या—** काञ्चुकीय: उदयनं प्रति दर्शकस्य संदेशं कथयति—भवतां शत्रव: भेदनीत्या वैमनस्यं प्रापिता:। भवतां दयादाक्षिण्यादिषु गुणेषु अनुरक्ता: नागरिका: समाश्वासिता:, भवतां विजययात्रावसरे य: सैन्यसमूह: पृष्टे चलति, तस्य अपि विधानं विहितम्। व्यूहादिनिर्माणं कृतम्, इति भाव:। शत्रूणां विनाशाय यत्-यत् अपि कार्यं आवश्यकं आसीत्, तत् तत् सर्वं मया प्रयत्नपूर्वकं कृतम्। अन्यच्च सैन्यसमूहै: गंगानदी अपि लंघिता। अत: अस्यां स्थितौ वक्तुं शक्यते यत् वत्सदेशा: भवतां हस्ते आगता: एव। युद्धे वयं अवश्यमेव विजयी भविष्याम:. इति भाव:। अत: भवान् शीघ्रं युद्धाय प्रस्थानं करोतु, विलम्बो न कार्य: इति।

**5.13 संस्कृत-व्याख्या—** राजादर्शकस्य सदेशं श्रुत्वा त्व शत्रो: आरुणे: विनाशाय सन्नद्ध: उदयन: कथयति, उत्साहितो भूत्वा—श्रेष्ठगजराजैश्च अश्वैश्च व्याप्ते, प्रक्षिप्ते बाणा: इतस्तत: विकीर्णा: तरंभंगा इव यस्मिन्, तादृशे महासागरमसदृशे संग्रामे समीपं गत्वा नैव दूरत:, शत्रो: सम्मुखो भूत्वा इति भाव:। क्रूरकार्यकुशलं भयंकरकायेषु दक्षमिति वा तं आरुणि नामकं स्वशत्रुविशेषं अहं सद्य एवं घातयामि।

## अनुप्रयोग:

**प्रश्न-1. एकेन पदेन उत्तरत-**

(1) काकोदररूपेण किं आसीत्?

(2) पद्मवत्या अनगतया भवितव्यम्, क: कथयति?

(3) हां इति करोत्वत्र भवान् क: कथयति?

(4) उज्जयिन्यां रमणीयस्थानानि कानि?

(5) कृतमाकाश वादितम् कथम्?

(6) ईश्वर: अकरुण: कथं कथ्यते वासवदत्तया?

(7) वासवदत्ताया: राज्ञ: दर्शनेन किं निष्फलं सम्भाव्यते?

(8) 'वासवदत्ते! तिष्ठ तिष्ठ' इति उदयनेन कुत्र कथितम्?

(9) रुमण्वता पूर्वं वञ्चितोऽस्मि इति क: कथयति?

(10) विरचिका का?

**प्रश्न-1. एकेन वाक्येनोत्तरत-**

(1) 'पद्मावती शीर्षवेदया दु:खितेति' कस्या: कथनम्?

(2) तत: स्वयमेवागमिष्यति का?

(3) आवन्तिकागत्य तत्र किं करिष्यति?

(4) शय्या कुत्र आस्तीर्णा।

(5) मङ्गलोत्सवे राज्ञ: उदयनस्य किमभवत्?

(6) तेन हि भर्त्रे निवेदयेनाम् काम्?

(7) हिमहतापद्मिनीव का?

(8) रूपश्रिया प्रमुदिता का?

(9) दीपप्रभावात् सूचितरूपो क: दृष्ट:?

(10) वस्तुत: किं स: काकोदर एव आसीत्।

**प्रश्न-3. अध: पदानि लिखितानि तेषां प्रकृतिप्रत्यया: पृथक्-पृथक् लेख्या:।**

| | पदानि | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (1) | शब्दायस्व | .................. | .................. |
| (2) | विनोदयति | .................. | .................. |
| (3) | कुत्र | .................. | .................. |
| (4) | त्वरताम् | .................. | .................. |
| (5) | समुदिताम् | .................. | .................. |
| (6) | परिवर्तमान: | .................. | .................. |
| (7) | अवनता | .................. | .................. |
| (8) | स्मरन्त्या: | .................. | .................. |
| (9) | अवसुप्ता | .................. | .................. |
| (10) | स्वप्नायते | .................. | .................. |
| (11) | आरोप्य | .................. | .................. |

| | | | |
|---|---|---|---|
| (12) | चिन्तयता | .................. | .................. |
| (13) | युधि | .................. | .................. |

**प्रश्न-4. अधोलिखितानां शब्दानां पर्यायाः लेख्याः-**

| | | | |
|---|---|---|---|
| (1) | युध् | .................. | .................. |
| (2) | त्रिपथगा | .................. | .................. |
| (3) | मन्त्री | .................. | .................. |
| (4) | काकोदरः | .................. | .................. |
| (5) | दाराः | .................. | .................. |
| (6) | सिरः | .................. | .................. |
| (7) | भागीरथी | .................. | .................. |
| (8) | पाणिः | .................. | .................. |
| (9) | प्रमादः | .................. | .................. |
| (10) | प्रावारः | .................. | .................. |
| (11) | वसुधा | .................. | .................. |
| (12) | मूर्धा | .................. | .................. |

**प्रश्न-5. अधोलिखितानां समास विग्रहानां समस्तपद समास नामानि च लेख्यानि।**

| | **चिग्रहः** | **समस्त पदानि** | **समासनामानि** |
|---|---|---|---|
| (1) | देव्या वियोगः | .................. | .................. |
| (2) | विधुरं हृदयं यस्य सः | .................. | .................. |
| (3) | पद्मावत्या पाणिग्रहणम् | .................. | .................. |
| (4) | पुनरागतो दाराणां भारः यस्य स | .................. | .................. |
| (5) | हृता अङ्ग यष्टिः यस्या | .................. | .................. |
| (6) | रुजया सहितः | .................. | .................. |
| (7) | पूर्वश्चासौ अभिघातः | .................. | .................. |
| (8) | सूचितं रूपं यस्य सः | .................. | .................. |
| (9) | ऋजुश्चासौ आयता च ताम् | .................. | .................. |
| (10) | नयनयो अन्तौ | .................. | .................. |
| (11) | स्रस्तः कोणो यस्मात्। | .................. | .................. |
| (12) | दीपः सहायो यस्याः | .................. | .................. |
| (13) | निवृतः रोगो यस्यां सा | .................. | .................. |
| (14) | प्रतिज्ञाया भारः | .................. | .................. |
| (15) | भूतश्चासौ अर्थः | .................. | .................. |
| (16) | हस्तिनश्च अश्वाश्व रथाश्च। | .................. | .................. |

**प्रश्न-6. अधोलिखितानां श्लोकानामन्वयेषु रिक्तस्थानानि पूरयत।**

(1) .......... कालक्रमेण .............. लावाणके.................।
हृगङ्गयष्टिं .................... पद्मिनी हिमहतानिव...........॥

(2) रूपश्रिया .......... गुणातश्च.................। प्रियां लब्ध्वा .......... म शोकोमन्दइव॥
पूर्वामिघात सरुजः ..................... पद्मावतीम्............. तथैव समर्थयामि।

(3) शय्याम् अवसुप्तं ................... बोधयित्वा......................।
दग्धा .................ब्रुवता रुमण्वता................ वञ्चितोऽस्मि॥

**प्रश्न-7. पञ्चमाङ्कस्य कथासारः संक्षेपेणलेख्यः।**

## योग्यताविस्तारः

## अग्निपुराणे अष्टत्रिंशत्तमे अध्याये नाटकनिरूपणम्

अल्पमात्रं समुद्दिष्टं बहुधा यत्प्रसर्पति।
फलावसानं यच्चैव बीजं तदभिधीयते॥22॥

यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा।
काव्ये शरीरानुगतं तन्मुखं परिकीर्तितम्॥23॥

इष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः।
रागप्राप्तिः प्रयोगस्य गुह्यानां चैव गूहनम्॥24॥

आश्चर्यवदभिख्यातं प्रकाशानां प्रकाशनम्।
अङ्गहीनो नरो यद्वन्न श्रेष्ठं काव्यमेव च॥24॥

देशकालैर्विना किंचिन्नेतिवृत्तं प्रवर्तते।
अतस्तयोरुपादानं नियमात्पदमुच्यते॥26॥

देशेषु भारतं वर्षं काले कृतयुगत्रयम्।
नर्ते ताभ्यां प्राणभृतां सुखदुःखोदयः क्वचित्।
सर्गे सर्गादिवार्त्ता च प्रसञ्जन्ती न दुष्यति॥27॥

❖ ❖ ★ ❖ ❖

॥श्रीः॥

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तम्

# षष्ठोऽङ्कः

## पूर्व पीठिका

पूर्वस्मिन् पञ्चमेऽङ्के पद्मावत्या शिरोवेदनां वृतान्तं श्रुत्वोदयनः विदूषकेन सहसमुद्रगृहं गतः किन्तु तदानीं पद्मावती तत्रानागतासीत्। विदूषकेन तर्कितम् यदनयानागतया भवितव्यम्-''शय्यानावता वासवदत्ता शीघ्रं स्वयं मुञ्चति। ततः तत्रैव शय्यायां मुहूर्तकमुपविश्य पद्मावती'' प्रतीक्षन् राजा निद्राशीलोऽभवत्। तदा स विदूषकं कथिवान् वयस्य निद्रा मां बाधते कथ्यतां काचिद् कथा। तदा सः ''अस्तिनगर्युज्जयनीनाम प्रद्योत वर्तन्ते किल। राज्ञोक्तम्-कथं उज्जयिनीनाम। तदा विदूषकेन कथितम् राजन् नाभिप्रतैषा कथा चेदन्यां तावत् कथयामि। राज्ञोक्तम् एवं नास्ति किन्तु-''स्मराम्यव न्त्याधिपते सुतायाः प्रस्थान काले स्व जनं स्मरन्त्याः वाष्पप्रकृतं नयनान्तरालं स्नेहान्मवैवोरसि पातयन्त्याः''।

विदूषकः अन्यां कथां कथयन् अस्ति नगरं ब्रह्मदत्तं नाम राजा काम्पिल्यो नाम इति कथन्नेव राज्ञा निषिद्धः कथं नगरं ब्रह्मदत्त मिति तदा नगरं काम्पिल्यं राजा ब्रह्मदतः इति ओष्ठगतं कुर्वन् विदूषकः आत्मनं प्रावारकं ग्रहीतुं गतः तदा प्रविशतः आवन्तिका चेटी च। वासवदत्तया कुत्र शयनीयं रचितं पद्मावत्याः इति पृष्टे सति समुद्रगृहके इति उत्तरितं चेट्या। किन्तु तत्र समुद्रगृहके पद्मावत्या स्थाने राजा उदयनः सुप्तः आसीत् तत्रैव शयने यदा वासवदत्ता तिष्ठति तदा राजा स्वप्नायते-हा वासवदत्ते। वासवदत्तया चिन्तितं किंनु खलु दृष्टास्मि तदैव पुनः राजा स्वप्नायते हा अवन्तिराजपुत्रि! तदा स्वप्ने एव राज्ञा सह वासवदत्तायाः वार्तालापे सति शय्याप्रलम्बितमुदयनस्य हस्तं शय्यायामारोपणसमये सहसा राजा निन्द्रा भग्नः सन् निष्क्रामन् द्वारपक्षेणताडितः भूतार्थं व्यक्तं न ज्ञातवान्। तदैव विदूषकः प्रविशति कथयति च प्रतिवुद्धोऽसितत्रभवान्! राजाकथयति-वयस्य! प्रियामावेक्ष्ये जीवति खलु वासवदत्ता विदूषकेनोक्तम् कुत्र वासवदत्ता चिरादुपरता सा।

वयस्य मा मैवम्

''शय्यामवसुप्तं मां बोधयित्वा सखे गता।
दग्धेति ब्रुवतापूर्वं वाञ्चितोऽस्मि रुमण्वता॥

विदूषकेन कथितमसम्भवमेतत् सा स्वप्ने दृष्टाभवेत्। अनन्तरं विदूषकेन सह चतुः शाल

**भवने प्रविष्टे उदयने काञ्चुकीयः कथयति अस्माकं महाराजो दर्शको भवन्तमाह-भवतः अमात्यो रुमण्वान् महता समुदायेनोपयातः आरुणिमुपघातयितुं तदुत्तिष्ठतु भवान्। अपरंच भिन्ना स्तेरिपवः बलैः त्रिपथगानदीतीर्णा वस्ताश्च हस्ते तव तदा राजा-उपेन्द्रनागेन्द्र तुटङ्गतीर्णे तमारुणिं दारुण कर्मदक्षम् विकीर्ण बाणोग्रतरङ्ग भङ्गे महार्णवाभेयुधि नाशयामि इति कथयति राजनि सर्वे निष्क्रान्ताः।**

**अतः परं षष्ठोऽङ्कः**

(ततः प्रविशति काञ्चुकीयः।)

**काञ्चुकीयः**—क इह भोः! काञ्चनतोरणद्वारमशून्यं कुरुते?

(प्रविश्य)

**प्रतीहारी**-अय्य! अहं विजआ। किं करीअदु? [आर्य! अहं विजया। किं क्रियताम्?]

**काञ्चुकीयः**-भवति! निवेद्यतां निवेद्यतां वत्सराज्यलाभप्रवृद्धोदयायोदयनायएव खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतीकारमुपस्थिताविति।

**प्रतीहारी**-अर्य्या अदेशकालो पडिहारस्य। [आर्य! अदेशकालः प्रतीहारस्य।]

**काञ्चुकीयः**-कथमदेशकालो नाम?

**प्रतीहारी**-सुणादु अय्यो। अज्ज भट्टिणो सुय्यामुहप्पासादगदेण केण वि वीणा वादिदा। तं च सुणिअ भट्टिणा भणिअं-घोसवदीए सद्दो विअ सुणीअदि त्ति। [श्रृणोत्वार्यः। अद्य भर्तुः सूर्यामुखप्रासादगतेन केनापि वीणा वादिता। तां च श्रुत्वा भर्त्रा भणितम्-घोषवत्याः शब्द ईव श्रूयत इति।]

**काञ्चुकीयः**-ततस्ततः?

**प्रतीहारी**-तदो तहिं गच्छिअ पुच्छिदो-कुदो इमाए वीणाए आगमो त्ति। तेण भणिअं-अह्मेहिं णम्मदातीरे कुच्चगुम्मलग्गा दिट्ठा। जइ प्पओअण इमाए, उवणीअदु भट्टिणो त्ति। तं च उवणीदं अङ्के करिअ मोहं गदो भट्टा। तदो मोहप्पच्चागदेण बप्फपय्याउलेण मुहेण भट्टिणा भणिअं-दिट्ठासि घोसवदि! सा हु ण दिस्सदि त्ति। अय्य! ईदिसो अणवसरो। कहं णिवेदेमि? [ततस्तत्र गत्वा पृष्टः-कुतोऽस्या वीणाया आगम इति। तेन भणितम्-अस्माभिर्नर्मदातीरे कूर्चगुल्मलग्ना दृष्टा। यदि प्रयोजनमनया, उपनीयतां भत्रे इति। तां चोपनीतामङ्के कृत्वा मोहं गतो भर्ता। ततो मोहप्रत्यागतेन बाष्पपर्याकुलेन मुखेन भर्त्रा भणितमदृष्टासि घोषवति! सा खलु न दृश्यत इति। आर्य! ईदृशोऽनवसरः। कथं निवेदयामि?]

**काञ्चुकीयः**-भवति! निवेद्यताम्। इदमपि तदाश्रयमेव।

**प्रतीहारी**-अय्य! इअं णिवेदेमि। एसो भट्टा सुय्यामुहप्पासादादो ओदरइ। तां इह एव्व णिवेदइस्सं! [आर्य! इहं निवेदयामि। एष भर्ता सूर्यामुखप्रासादादवतरति। तदिहेव निवेदयिष्यामि।]

**काञ्चुकीयः**-भवति। तथा।

(उभौ निष्क्रान्तौ।)

**मिश्रविष्कम्भकः।**

(ततः प्रविशति राजा विदूषकश्च)

**राजा**-

**श्रुतिसुखनिनदे! कथं नु देव्याः स्तनयुगले जघनस्थले च सुप्ता।**
**विहगगणरजोविकीर्णदण्डा प्रतिभयमध्युषिताऽस्यरण्यवासम्॥1॥**

**अन्वयः**-हे श्रुतिमुखनिनदे! देव्याः स्तनयुगले जघनस्थले च सुप्ता (सती) (सम्प्रति) कथं नु विहगगणरजोविकीर्णदण्डा (सती) प्रतिभयम् अरण्यवासम् अध्युषिता असि।

**अपि च, अस्निग्धासि घोषवति! या तपस्विन्या न स्मरसि-**

**श्रोणीसमुद्वहनपार्श्वनिपीडितानि खेदस्तनान्तरसुखान्युपगूहितानि।**
**उद्दिश्य मां च विरहे परिदेवितानि वाद्यान्तरेषु कथितानि च सस्मितानि॥2॥**

**अन्वयः**-श्रोणीसमुद्वहनपार्श्वनिपीडितानि खेदस्तनान्तरसुखानि उपगूहितानि, विरहे माम् उद्दिश्य पिरदेवितानि वाद्यान्तरेषु सस्मितानि कथितानि च (न स्मरसि)॥2॥

**विदूषकः**-अलं दाणिं भवं अदिमत्तं सन्तप्पिअ। [अलमिदानीं भवानतिमात्रं सन्तप्य।]

**राजा**-वयस्य! मा मैवम्।

**चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।**
**तां तु देवीं न पश्यामि यस्या घोषवती प्रिया॥3॥**

**अन्वयः**-चिरप्रसुप्तो मे कामः वीणया प्रतिबोधितः, यस्या घोषवती प्रिया; तां देवीं तु न पश्यामि॥3॥

**वसन्तक! शिल्पिजनसकाशान्नवयोगां घोषवतीं कृत्वा शीघ्रमानय।**

**विदूषकः**-जं भवं आणवेदि। (वीणां गृहीत्वा निष्क्रान्तः।) [यद् भवानाज्ञापयति।]

(प्रविश्य)

**प्रतिहारी**-जेदु भट्टा। एसो खु महासेणस्स सआसादो रैब्भसगोत्तो कंचुईओ देवीए अङ्गारवदीए पेसिदा अय्या वसुन्धरा णाम वासवदत्ताधती अ पडिहारं उवट्ठिदा। [जयन्तु भर्ता। एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयो देव्याऽङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतीहारमुपस्थितौ।]

**राजा**-तेन हि पद्मावती तावदाहूयताम्।

**प्रतीहारी**-जं भट्टा आणवेदि। (निष्क्रान्ता) [यद् भर्ताज्ञापयति।]

**राजा**-किन्नु खलु शीघ्रमिदानीमयं वृत्तान्तो महासेनेन विदितः?

(ततः प्रविशति पद्मावती प्रतीहारी च।)

**प्रतिहारी**-एदु एदु भट्टिदारिआ। [एत्वेतु भर्तृदारिका।]

**पद्मावती**-जेदु अय्यउत्तो। [जयत्वार्यपुत्रः।]

**राजा**-पद्मावति! किं श्रुतं? महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतीहारमुपस्थिताविति।

**पद्मावती**-अय्यउत्त! पिअं मे आदिकुलस्य कुसलवुत्तंतं सोदुं। [आर्यपुत्र! प्रियं मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम्।]

**राजा**-अनुरूपमेतद् भवत्याभिहितं-वासवदत्तास्वजनो मे स्वजन इति। पद्मावती! आस्यताम्। किमिदानीं

नास्यते?

**पद्मावती**-अय्यउत्त! किं मए सह उवविट्ठो एवं जणं पेक्खिस्सदि? [आर्यपुत्र! किं मया सहोपविष्ट एतं जनं द्रक्ष्यति?]

**राजा**-कोऽत्र दोषः?

**पद्मावती**-अय्यउत्तस्य अवरो परिग्गहो त्ति उदासीणं विअ होदि। [आर्यपुत्रस्यापरः परिग्रह इत्युदासीनमिव भवति।]

**राजा**-कलत्रदर्शनार्ह जनं कलत्रदर्शनात् परिहरतीति बहुदोषमुत्पादयति। तस्मादास्यताम्।

**पद्मावती**-जं अय्यउत्तो आणवेदि। (उपविश्य) अय्यउत्त! तादो वा अम्बा वा किं णु खु भणिस्सदि त्ति आविग्गा विअ संवुत्ता। [यदार्यपुत्र आज्ञापययि। आर्यपुत्र! तातो वाऽम्बा वा किन्नु खलु भणिष्यतीत्याविग्नेव संवृत्ता।]

**राजा**-पद्मावति! एवमेतत्।

**किं वक्ष्यतीति हृदयं परिशङ्कितं मे**
**कन्या मयाप्यपहृता न च रक्षिता सा।**
**भाग्यैश्चलैर्महदवाप्तगुणोपघातः**
**पुत्रः पितुर्जनितरोष इवास्मि भीतः॥4॥**

**अन्वयः**-किं वक्ष्यति इति मे हृदयं परिशङ्कितम्। मया कन्या अपहृता अपि। सा च न रक्षिता। चलैः भाग्यैः महदवाप्तगुणोपघातः पितुः जनितरोषः पुत्र इव भतः अस्ति॥4॥

**पद्मावती**-ण किं सक्कं रक्खिदुं पत्तकाले? [न किं शक्यं रक्षितुं प्राप्तकाले?]

**प्रतीहारी**-एसो कञ्चुईओ धत्ती अ पडिहारं उवट्ठिदा। [एष काञ्चुकीयो धात्री च प्रतीहारमुपस्थितौ।]

**राजा**-शीघ्र प्रवेश्यताम्।

**प्रतीहारी**-जं भट्टा आणवेदि। (निष्क्रान्ता)। [यद् भर्ताऽऽज्ञापयति।]

(ततः प्रविशति काञ्चुकीयो धात्री प्रतीहारी च।)

**काञ्चुकीयः**-

**सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः**
**स्मृत्वा पुनर्नृपसुतानिधनं विषादः।**
**किं नाम दैव! भवता न कृतं यदि स्याद्**
**राज्यं परैरपहृतं कुशलं च देव्याः॥5॥**

**अन्वयः**-इदम् सम्बन्धिराज्यम् एत्य महान् प्रहर्षः, पुनः नृपसुतानिधनं स्मृत्वा महान् विषादः (अस्ति) हे दैव! परैः अपहृतं राज्यं देव्याः कुशलं च स्यात् यदि? तर्हि भवता किं नाम न कृतम्?॥5॥

**प्रतीहारी**-एसो भट्टा, उवसप्पदु अय्यो। [एष भर्ता, उपसर्पत्वार्यः।]

**काञ्चुकीयः**-(उपेत्य) जयत्वार्यपुत्रः।

**धात्री**-जेदु भट्टा। [जयतु भर्ता।]

**राजा**-(सबहुमानम्) आर्य!

**पृथिव्यां राजवंश्यानामुदयाऽस्तमयप्रभुः।**
**अपि राजा स कुशली मया काङ्क्षितबान्धवः?॥6॥**

**अन्वयः**-पृथिव्यां राजवंश्यानाम् उदयाऽस्तमयप्रभुः (एवं च) मया काङ्क्षितबान्धवः स राजा कुशली अपि?॥6॥

**काञ्चुकीयः**-अथ किम्? कुशली महासेनः। इहापि सर्वगतं कुशलं पृच्छति।

**राजा**-(आसनादुत्थाय) किमाज्ञापयति महासेनः?

**काञ्चुकीयः**-सदृशेतद् वैदेहीपुत्रस्य। नन्वासनस्थेनैव भवता श्रोतव्यो महासेनस्य सन्देशः।

**राजा**-यदाज्ञापयति महासेनः। (उपविशति)

**काञ्चुकीयः**-दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतमिति। कुतः-

**कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।**
**प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥7॥**

**अन्वयः**-ये कातरा अपि वा अशक्ताः तेषु उत्साहो न जायते। हि प्रायेण नरेन्द्रश्रीः सोत्साहैः एव भुज्यते॥7॥

**राजा**-आर्य! सर्वमेतन्महासेन प्रभावः। कुतः-

**अहमवजितः पूर्वं तावत् सुतैः सह लालितो**
**दृढमपहृता कन्या भूयो मया न च रक्षिता।**
**निधनमपि च श्रुत्वा तस्यास्तथैव मयि स्वता**
**ननु यदुचितान् वत्सान् प्राप्तु नृपोऽत्र हि कारणम्॥8॥**

**अन्वयः**-पूर्वं तावत् अहम् अवजितः, सुतैः सह लालितः। मया कन्या दृढम् अपहृता, भूयो न रक्षिता च। तस्या निधनम् अपि श्रुत्वा, मयि तथा एव स्वता। मनु उचितान् वत्सान् प्राप्तुम् अत्र नृपः कारणं हि॥8॥

**काञ्चुकीय**-एष महासेनस्य सन्देशः। देव्याः सन्देशमिहात्रभवतो कथयिष्यति।

**राजा**-हा! अम्ब!

**षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता।**
**मम प्रवासदुःखार्ता माता कुशलिनी ननु?॥9॥**

**अन्वयः**-षोडशाऽन्तःपुरज्येष्ठा पुण्या नगरदेवता मम प्रवासदुःखार्ता माता कुशलिनी ननु?॥9॥

**धात्री**-अरोआ भट्टिणी भट्टारं सव्वगदं कुसलं पुच्छदि। [अरोगा भट्टिनी भर्तारं सर्वगतं कुशलं पृच्छति।]

**राजा**-सर्वगतं कुशलमिति? अम्ब! ईदृशं कुशलम्।

**धात्री**-मा दाणिं भट्टा अदिमत्तं सन्तप्पिदुं। [मेदानीं भर्तातिमात्रं सन्तप्तुम्।]

**काञ्चुकीयः**-धारयत्वार्यपुत्रः। उपरताऽप्यनुपरता। 'महासेनपुत्री एवमनुकम्प्यमानार्यपुत्रेण। अथवा-

**कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति?**
**एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥10॥**

**अन्वयः**-कः कमिति। मृत्युकाले कः कं रक्षितुं शक्तः? रज्जुच्छेदे के घटं धारयन्ति? एवं लोको वनानां तुल्यधर्मः, काले काले छिद्यते रुह्यते च॥10॥

**राजा**-आर्य मा मैवम्,

**महासेनस्य दुहिता शिष्या देवी च मे प्रिया।**
**कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि॥11॥**

**अन्वयः**-महासेनस्य दुहिता मे शिष्या प्रिया देवी च सा मया देहान्तरेष्वपि कथं स्मर्तुं शक्ता न?॥11॥

**धात्री**-आह भट्टिणी-उदरदा वासवदत्ता। मम वा महासेणस्स वा जादिसा गौवालअपालआ, तादिसो व्व तुमं पुढमं एव्व अभिपपेदो जामादुअत्ति। एदण्णिमित्तं उज्जइणिं आणीदो। अणग्गिसक्खिअं वीणाववदेसेण दिण्णा। अत्तणो चवलदाए अणिवुत्तविवाहमङ्गलो एव्व गदो। अहअ अह्मेहिं तव अ वासवदत्ताए अ पडिकिदिं चित्तफलआए आलिहिअ विवाहो शिब्बुतो। एसा चित्तफलआ तब सआसं पेसिदा। एदं पेक्खिअ णिव्वुदो होहि। [आह भट्टिनी-उपरता वासवदत्ता। मन वा महासेनस्य वा यादृशौ गोपालकपालकौ, तादृश एवं त्वं प्रथममेवाभिप्रेतो जामातेति। एतन्निमित्तमुज्जयिनीमानीतः। अनग्निसाक्षिकं वीणाव्यपदेशेन दत्ता। आत्मनश्चपलतयाऽनिर्वृत्तविवाहमङ्गल एव गतः। अथ चावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृतः। एषां चित्रफलका तव सकाशं प्रेषिता। एतां दृष्ट्वा निर्वृतो भव।]

**राजा**-अहो! अतिस्निग्धमनरूपं चाभिहितं तत्रभवत्या।

**वाक्यमेतत् प्रियतरं राज्यलाभशतादपि।**
**अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः॥12॥**

**अन्वयः**-एतत् वाक्यं राज्यलाभशतात् अपि प्रियतरम्। यत् अपराद्धेषु अपि अस्मासु स्नेहो न विस्मृतः॥12॥

**पद्मावती**-अय्यउत्त! चित्तगदं गुरुअणं पेक्खिअ अीावावेदुं इच्छामि। [आर्यपुत्र! चित्रगतगुरुजनं दृष्ट्वाभिवादयितुमिच्छामि।]

**धात्री**-पेक्खदु पेक्खदु भट्टिदारिआ। (चित्रफलकां दर्शयति।) [पश्यतु पश्यतु भर्तृदारिका।]

**पद्मावती**-(दृष्टवा आत्मगतम्) हं! अदिसदिसो खु इअं अय्याए आवन्तिआए। (प्रकाशम्) अय्यउत्त! सदिसी खु इअं अय्याए? [हम्! अतिसदृशी खल्वियमार्याया आवन्तिकायाः आर्यपुत्र! सदृशी खल्वियमार्यायाः?]

**राजा**-न सदृशी! सैवेति मन्यें। भोः कष्टम्।

**अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्?**
**इदं च मुखमाधुर्यं कथं दूषितमग्निना?॥13॥**

**अन्वयः**-अस्य-स्निग्धस्य वर्णस्य दारुणा विपत्तिः कथम्? इदं मुखमाधुर्यम् अग्निना कथं दूषितम्?॥13॥

**पद्मावती**-अय्यउत्तस्स पडिकिदं पेक्खिअ जाणामि इअं अय्याए सदिसी ण वेत्ति। [आर्यपुत्रस्य प्रतिकृति दृष्ट्वा जानामीयमार्यायाः सदृशी न वेति।]

**धात्री**-पेक्खदु पेक्खदु भट्टिदारिआ। [पश्यतु पश्यतु भर्तृदारिका।]

**पद्मावती**-(दृष्ट्वा) अय्यउत्तस्स पडिकिदीए सदिसदाए जाणामि इअं अय्याए सदिसीत्ति। [आर्यपुत्रस्य

प्रतिकृत्याः सदृशतया जानामीयमार्यायाः सदृशीति।)

**राजा**-देवि! चित्रदर्शनात् प्रभृति प्रहृष्टोद्विग्नामिव त्वां पश्यामि। किमिदम्?

**पद्मावती**-अय्यउत्त! इसाए पडिकिदीए सदिसी इह एव्व पडिवसदि। [आर्यपुत्र! अस्याः प्रतिकृत्याः सदृशीहैव प्रतिवसति।]

**राजा**-किं वासवदत्तायाः?

**पद्मावती**-आम्। [आम्।]

**राजा**-तेन हि शीघ्रमानीयताम्।

**पद्मावती**-अय्यउत्त! मम कण्णाभावे केणवि बह्मणेण मम भइणिअत्ति ण्णासो णिक्खित्तो। पोसिदभत्तुआ परपुरुसदंसणं परिहरदि। ता अय्यं मए सह आअदं पेक्खिअ जाणादु अय्यउत्तो। [आर्यपुत्र! मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिकेति न्यासो निक्षिप्तः। प्रोषितभर्तृका परपुरुषदर्शनं परिहरति। तदार्यां मया सहागतां दृष्ट्वा जानात्वार्यपुत्रः।]

**राजा**-

**यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।**
**परस्परगता लोके दृश्यते रूपतुल्यता॥14॥**

**अन्वयः**-विप्रस्य भगिनी यदि (तर्हि) व्यक्तम् अन्या भविष्यति। लोके परस्परगता रूपतुल्यता दृश्यते।

(प्रविश्य)

**प्रतीहारी**-जेदु भट्टा। एसो उज्जइणीओ बह्मणो, भट्टिणीए हत्थे मम भइणिअत्ति ण्णासो णिक्खित्तो, तं पडिग्गहिदुं पडिहारं उवट्ठिदो। [जयतु भर्ता। एष उज्जयिनीयो ब्राह्मणः, भट्टिन्या हस्ते मम भगिनिकेति न्यासो निक्षिप्तः, तं प्रतिग्रहीतुं प्रतीहारमुपस्थितः।]

**राजा**-पद्मावती! किन्नु स ब्राह्मणः?

**पद्मावती**-होदव्वं। [भवितव्यम्।]

**राजा**-शीघ्र प्रवेश्यतामभ्यन्तरसमुदाचारेण स ब्राह्मणः।

**प्रतीहारी**-जं भट्टा आणवेदि। (निष्क्रान्ता) [यद् भर्ताज्ञापयति।]

**राजा**-पद्मावति! त्वमपि तामानय।

**पद्मावती**-जं अय्यउत्तो आणवेदि। [यद् आर्यपुत्र आज्ञापयति।]

(ततः प्रविशति यौगन्धरायणः प्रतीहारी च)

**यौगन्धरायणः**-भोः! (आत्मगतम्)

**प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं**
**कामं मया कृतमिदं हितमित्यवेक्ष्य।**
**सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ**
**किं वक्ष्यतीति हृदयं परिशङ्कितं मे॥15॥**

**अन्वयः**-नृपतेः हिताऽर्थं राजमहिषीं प्रच्छाद्य मया हितम् इति अवेक्ष्य इदं काम कृतम्। मम कर्मणि सिद्धे

अपि असौ पार्थिवः किं वक्ष्यति इति मे हृदयं परिशङ्कितं नाम॥15॥

**प्रतीहारी**–एसो भट्टा, उपसप्पदु अय्यो। [एष भर्ता। उपसर्पत्वार्थः।]

**यौगन्धरायणः**–(उपसृत्य) जयतु भवान् जयतु।

**राजा**–श्रुतपूर्व इव स्वरः। भो ब्राह्मण! किं भवतः स्वसा पद्मावत्या हस्ते न्यास इति निक्षिप्ता?

**यौगन्धरायणः**–अथ किम्?

**राजा**–तेन हि त्वर्यतां त्वर्यतामस्य भगिनिका।

**प्रतीहारी**–जं भट्टा आणवेदि। (निष्क्रान्ता) [यद् भर्ताज्ञापयति।]

(ततः प्रविशति पद्मावती आवन्तिका प्रतीहारी च।)

**पद्मावती**–एदु एदु अय्यरा! पिअं दे णिवेदेमि। [एत्वेत्वार्या! प्रियं ते निवेदयामि।]

**आवन्तिका**–किं किं? [किं किम्?]

**पद्मावती**–भादा दे आअदो। [भ्राता ते आगतः।]

**आवन्तिका**–दिट्ठिअ दाणिं पि सुमरदि। [दृष्ट्येदानीमपि स्मरति।]

**पद्मावती**–(उपसृत्य) जेदु अय्यउत्तो। एसो ण्णासो। [जयत्वार्यपुत्रः एष न्यासः।]

**राजा**–निर्यातय पद्मावति! साक्षिमन्न्यासो निर्यातमितव्यः। इहात्रभवान् रैभ्यः अत्रभवती चाधिकरणं भविष्यतः।

**पद्मावती**–अय्य! णीअदां दाणिं अय्या। [आर्य! नीयतामिदानीमार्या।]

**धात्री**–(आवन्तिकां निर्वर्ण्य) अम्मो! भट्टिदारिआ वासवदत्ता? [अम्भो! भर्तृदारिका वासवदत्ता?]

**राजा**–कथं महासेनपुत्रो? देवि! प्रविश त्वमभ्यन्तरं पद्मावत्या सह।

**यौगन्धरायणः**–न खलु न खलु प्रवेष्टव्यम्। मम भगिनी खल्वेषा।

**राजा**–किं भवानाह? महासेनपुत्री खल्वेषा।

**यौगन्धरायणः**–भो राजन्!

**भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।**
**तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः॥16॥**

**अन्वयः**–भारतानां कुले जातो विनीतो ज्ञानवान् शुचिः राजधर्मस्य देशिकः, (त्वम् असि), तत् बलात् हर्तुं न अर्हसि परकीयन्यासमिति शेषः॥16॥

**राजा**–भवतु, पश्यामस्तावद् रूपसादृश्यम्! संक्षिप्यतां जवनिका।

**यौगन्धरायणः**–जयतु स्वामी।

**वासवदत्ता**–जेदु अय्यउत्तो। [जयत्वार्यपुत्रः।]

**राजा**–अये! असौ यौगन्धरायणः, इयं महासेनपुत्री।

**किन्नु सत्यमिदं स्वप्नः, सा भूयो दृश्यते मया।**
**अनयाऽप्येवमेवाहं दृष्ट्वा वञ्चितस्तदा॥17॥**

**अन्वयः**-इदं किं सत्यं, स्वप्नो नु? सा मया भूयो दृश्यते। अहं तदा अपि एवम् एव दृष्टया अनया वञ्चितः॥17॥

**यौगन्धरायणः**-स्वामिन्! देव्यपनयेन कृतापराधः खल्वहम्। तत् क्षन्तुमर्हति स्वामी। (इति पादयोः पतति।)

**राजा**-(उत्थाप्य) यौगन्धरायणो भवान् ननु।

**मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।**
**भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः॥18॥**

**अन्वयः**-मज्जमाना वयं मिथ्योन्मादैः युद्धैः शास्त्रदृष्टैः मन्त्रितैश्च भवद्यत्नैः समुद्धृताः खलु॥18॥

**यौगन्धरायणः**-स्वामिभाग्यानामनुगन्तारो वयम्।

**पद्मावती**-अम्महे! अय्या खु इअं। अय्ये! सहीजणसमुदाआरेण अजाणन्तीए अदिक्कन्दो समुदाआरो। ता सीसेण पसादेमि। [अहो! आर्या खल्वियम्। आर्ये! सखीजनसमुदाचारेणाऽजानन्त्याऽतिक्रान्तः समुदाचारः। तच्छीर्षेण प्रसादयामि।]

**वासवदत्ता**-(पद्मावतीमुत्थाप्य) उट्ठेहि उट्ठेहि अविहवे! उट्ठेहि। अत्थिसअं णाम सरीरं अवरद्धइ। [उत्तिष्ठोत्तिष्ठाविधवे! उत्तिष्ठ। अर्थिस्वं नाम शरीरमपराध्यति।]

**पद्मावती**-अणुग्गहिदह्मि। [अनुगृहीताऽस्मि।]

**राजा**-वयस्य! यौगन्धरायण! देव्यपनये का कृता ते बुद्धिः?

**यौगन्धरायणः**-कौशाम्बीमात्रं परिपालयामीति।

**राजा**-अथ पद्मावत्या हस्ते किं न्यासकारणम्?

**यौगन्धरायणः**-पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति।

**राजा**-इदमपि रुमण्वता ज्ञातम्?

**यौगन्धरायणः**-स्वामिन्! सर्वैरेव ज्ञातम्।

**राजा**-अहो! शठः खलु रुमण्वान्।

**यौगन्धरायणः**-स्वामिन्! देव्याः कुशलनिवेदनार्थमद्यैव प्रतिनिवर्ततामत्रभवान् रैभ्योऽत्रभवती च।

**राजा**-न, न, सर्व एव वयं यास्यामो देव्या पद्मावत्या सह।

**यौगन्धरायणः**-यदाज्ञापयति स्वामी।

(भरतवाक्यम्-)

**इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।**
**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥19॥**

**अन्वयः**-सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् एकाऽऽतपत्राऽङ्काम् इमां महीं नो राजसिंहः प्रशास्तु॥19॥

(निष्क्रान्ताः सर्वे।)

**।। इति षष्ठोऽकः ।।**

## श्लोकार्थः

6.1 **संस्कृत-व्याख्या—** प्रियायाः वासवदत्तायाः वियोगेन दुःखितः उदयनः घोषवतीं वीणां कथयति— हे कर्णप्रियस्वरसंयुक्ते वीणे! वादनकाले वासवदत्तायाः मम प्रियायाः कुचयुग्ममध्ये जघनप्रदेशमध्ये च भवति शयनं करोति स्म, तं गौरवास्पदं परित्यज्य पक्षीगणमलव्याप्तदण्डा सती, इदानीं भयंकरं वनवासं आश्रित्य कथं निवसति? कस्यां परिस्थित्यौ भवती तत्र प्राप्तवती, इति भावः।

6.2 **संस्कृत-व्याख्या—** उदयनः घोषवतीं अभिलक्ष्य कथयति— हे घोषवति! किं त्वं मम हृदयवल्लभां वासवदत्तां न स्मरसि, या वीणावादनकाले त्वं स्व जघनस्थले स्थापयति स्म। परिश्रान्ते सा त्वां स्वस्तनयुगलमध्ये कृत्वां उपगूहनं करोति स्म। एवमेव मम वियोगसमये मां उद्दिश्य सा प्रलपति स्म। यदा कदा वीणावादनस्य अभ्यासे अवकाशसमये सा सस्मितेन किमपि सम्भाषणं अकरोत्। एतादृशीं तां मम प्रियां स्व सखीं इव, त्वं यदि न स्मरसि, तर्हि त्वं निष्ठुरा असि, शून्यहृदया असि च।

6.3 **संस्कृत-व्याख्या—** उदयनः मित्रवसन्तकं प्रति कथयति— यत् हे मित्र! वस्तुतः एनां घोषवती नाम्नीं वीणां सहसा अवलोक्य मम चिरकालात् प्रसुप्तः कामः मनोऽभिलाषः उद्बोधितः, जागरितः वा। पुनः वीणां सम्बोध्य कथयति— हे वीणे! यस्यै त्वं प्रिया आसीः, सा तु इदानीं न दृश्यते किं कारणम्? सम्प्रति केवलं त्वमेव दृश्यसे,, सा मम प्रिया वासवदत्ता तु न दृश्यते, इति भावः।

6.4 **संस्कृत-व्याख्या—** उदयनः पद्मावतीं प्रति कथयति—महाराजप्रद्योतस्य कः संदेशः भवेत्, इति विचार्य मम हृदयं शंकितं वर्तते। कुतः मया तु तस्य पुत्र्याः वासवदत्तायाः अनुमतिं विना अपहरणं कृतम्। अत्रानीय च तस्याः रक्षा अपि न कृता, कुतः सा लावाणके अग्निकाण्डे दग्धा मृता च। अन्यच्च मया द्वितीयः विवाहोऽपि कृतः। एतत् सर्वं माम् अपराधपंक्तिं स्थापयति तस्य समक्षे। यथा कोऽपि पुत्रः स्वदौर्भाग्येन किमपि मर्यादोल्लघनं करोति, अपराधं करोति वा सः स्व पितुः समक्षे न आगन्तुं शक्नोति, भीतः भवति, एवमेव अहमपि अनुभवामि।

6.5 **संस्कृत-व्याख्या—** प्रद्योतस्य काञ्चुकीयः, उदयनस्य राज्यं समागत्य हर्षं विषादं च अनुभवन् कथयति— इदानीं अत्र सम्बन्धिनः उदयनस्य राज्यं आगत्य मे महान् हर्षः संजायते, किन्तु नृपसुतायाः वासवदत्तायाः आकस्मिकं निधनं श्रुत्वा महान् शोकः भवति। यदि दैववशात् देवस्य आनुकूल्येन या अरिणा हृतं राज्यं स्वायत्तीकृतं, शत्रोः ऊपरि विजयः सञ्जातः इत्यर्थः एवमेव यदि अस्मिन् समये वासवदत्ता अपि जीविता, स्यात्, तर्हि शोभनं भवेत्।

6.6 **संस्कृत-व्याख्या—** शिष्टाचारं निर्वाहयन् उदयनः काञ्चुकीयं प्रति कथयति— आर्य! अस्यां पृथिव्यां सर्वेषां नृपानां उत्कर्षे विनाशे वा पूर्णरूपेण समर्थः महाराज प्रद्योतः कुशलतापूर्वकं अस्ति? असौ राजा मया बन्धुभावेन अभिलषितः, इति किं तत्र सर्वं कुशलं वर्तते?

6.7 **संस्कृत-व्याख्या—** ये जनाः कायराः भवन्ति, असमर्थाः सन्ति। तेषु अध्यवसायः उत्साहः न उत्पद्यते। वस्तुतः अस्मिन् संसारे उत्साहसम्पन्नाः जनाः एव राज्यलक्ष्म्याः सुखं भुज्यन्ते। शास्त्रेषु अपि कथितम्— 'वीर भोग्या वसुन्धरा', इति।

6.8 **संस्कृत-व्याख्या—** उदयनः प्रद्योतस्य औदार्यं प्रभावातिशयं च कथयति— आर्य! पूर्वं गजमृगयाकाले वने काष्ठहस्तीछलेन मां स्व हस्तगतं कृत्वा, तेन महासेनेन स्व पुत्रैः सह प्रेमपूर्वकं अहम् पालितः, किन्तु कृतघ्नेन मया तस्य प्राणप्रियायाः पुत्र्याः वासवदत्तायाः अपहरणं कृतम्। कौशाम्बीं स्वराजधानीं आनीता अपि सा न रक्षिता, अपितु सा लावाणकग्रामे अग्निकाण्डे मृत्युं गतवती। पुनरपि एतत् सर्वं श्रुत्वा अपि सः महासेनः भवन्तं प्रेष्य मत्समीपे आत्मीयभावं प्रदर्शितवान्। वस्तुतः एषा तस्य महानता एव।

अस्यातिरिक्तं नाहं एकलः वत्सान् जेतुं समर्थः आसीत्, तस्य महासेनस्य सहयोगेन सहाय्यभावेन वा एतत् सर्वं सञ्जातम्, इति अतीव कृतज्ञोऽस्मि तं प्रति।

6.9 **संस्कृत-व्याख्या—** महासेनप्रद्योतस्य षोडशान्तःपुरस्थानां स्त्रीणां मध्ये या ज्येष्ठा महारानी वर्तते, या पवित्राचरणा शीलपरायणा च अस्ति, नगरवासिनः यां देवतावत् पूज्येन्ते, आदरं कुर्वन्ति आद्रियन्ते इति वा। उज्जयिनीतः वासवदत्तां गृहीत्वा वात्सल्येन या अतीव अवसादिता, अपि सा मम माता अंगारवती कुशलतापूर्वकं वर्तते ?

6.10 **संस्कृत-व्याख्या—** काञ्चुकीयः उदयनं प्रति कथयति— मरणसमयः सन्निकटे आगते सति कः जनः कं जनं रक्षितुं समर्थः भवति, न कोऽपि अवरोद्धुं न शक्नोति तथैव मृत्युसमयः आगमने कोऽपि रक्षितुं समर्थः न भवति। मृत्युविषये सर्वेषां निरीहत्वं प्रतिपादितम्। लोकेऽस्मिन् मनुष्याणां जन्ममृत्योः स्थितिः वृक्षादिवत् अस्ति। यथा वृक्षः छिन्ने सति पुनः रुह्यते, वृद्धिं प्राप्नोति, इति वा एवमेव मनुष्यः अपि महणात् अनन्तरं पुनः जन्म गृह्णाति। अतः विषयेऽस्मिन् शोकः न करणीयः।

6.11 **संस्कृत-व्याख्या—** उदयनः काञ्चुकीयं प्रति कथयति— यत् भवान् कथयति 'सा न शोचनीया' इति नोचितम्। कुतः महासेनस्य पुत्री वासवदत्ता न मम प्रिया एव आसीत्, अपितु वीणायाः शिक्षाप्रदानविषये सा मम शिष्या अपि आसीत्। मम हृदि सर्वोच्चपदे स्थिता वर्तते इति सा देवी, महारानी मदर्थं आसीत्। अतः तां विस्मर्तुं न समर्थोऽस्मि अथवा तां कथं विस्मर्तुं शक्नोमि। वस्तुस्थितिः तु एषा वर्तते यत् न केवलं अस्मिन् जन्मनि, अपितु अग्रिमे जन्मनि अपि तां वासवदत्तां नाहं विस्मर्तुं शक्नोमि।

6.12 **संस्कृत-व्याख्या—** यत् वचनं देव्या अंगारवत्या संप्रेषितम्, तत् बहुराज्यप्राप्तेः अपि स्निग्धं आनन्ददायकं च वर्तते। यद्यपि मया तां प्रति अपराधः कृतः, तस्याः पुत्र्याः वासवदत्तायाः अपहरणं कृतम्, तथापि सा मां प्रति एवं स्निग्धा अस्ति। वस्तुतः अहं अतीव सौभाग्यवान् अस्मि। यत् एतादृशी माता मिलिता एवं उदयनः अंगारवतीं प्रति स्व कृतज्ञतां ज्ञापितवान् श्लोकेऽस्मिन्।

6.13 **संस्कृत-व्याख्या—** अंगारवत्या सम्प्रेषिते त्रिफलके स्वप्रियायाः वासवदत्तायाः आकृतिं अवलोक्य उदयनः कथयति—अस्य लावणण्यसम्पन्नस्य अनिन्द्यसौन्दर्यस्य विनाशे विपत्तिरूपिणी स्त्री कथं निष्करुणा अभूत्। एवमेव अस्याः सौन्दर्यसम्पन्नं मुखं अग्निना केन प्रकारेण विनष्टम्, इत्यस्मिन् विषये निश्चयं कुर्तुं न पारयामि।

6.14 **संस्कृत-व्याख्या—** उदयनः पद्मावतीं प्रति कथयति—या स्त्री भवत्याः सन्निकटे वसति, यदि सा ब्राह्मण-भगिनी अस्ति, तर्हि सा वासवदत्ता भवितुं न शक्या, कुतः अस्मिन् संसारे प्रायः रूपसादृशं मिलति एव। वासवदत्ता तु क्षत्रिकन्या अस्ति न ब्राह्मणकन्या, अतः सा काचिद् अन्या भविष्यति इति भावः। इत्यर्थं अस्मिन् विषये शङ्का न कार्या।

6.15 **संस्कृत-व्याख्या—** ब्राह्मणवेषधारी यौगन्धरायणः उदयनस्य समीपे गच्छन् मनसि विचारयति—यद्यपि मया स्वामिनः उदयनस्य हितार्थं एव तस्य प्राणप्रिया वासवदत्ता प्रच्छाद्य पद्मावत्याः सन्निकटे न्यासरूपेण प्रस्थापिता। इदानीं च कार्यसिद्धिः सञ्जातेऽपि स्वस्वामिनः निकटे गच्छन् मम मनसि एका शंका वर्तते यत्–स्वामी उदयनः एतत् सर्वश्रुत्वा किं कथयिष्यति मया उचितं कृतं, अनुचितं कृतं वा इति भावः।

6.16 **संस्कृत-व्याख्या—** आवन्तिकां ब्राह्मणभगिनीं दृष्ट्वा सर्वे 'वासवदत्ता एषा' इति कथयन्ति, एतत् श्रुत्वा यौगन्धरायणः उदयनं प्रति कथथितम्— राजन्! न खलु एषा महासेन पुत्री, एषा तु मम भगिनी वर्तते। भवान् उच्चकुलोत्पन्नः शुद्धाचारवान्, ज्ञानसम्पन्नः च अस्ति, किं उचितं किं वा अनुचितं, इति

सम्यक् रूपेण जानाति। विनीत: भवान् राजोचितकर्तव्याणां उपदेष्टा। अत: एतं अनाचारं कर्तुं न शक्य:। वस्तुत: कार्यं एतत् करणं भवता नोचितं अस्ति इति भाव:।

**6.17 संस्कृत-व्याख्या—** अकस्मात् यौगन्धरायणं वासवदत्तां च पुरत: विलोक्य आश्चर्ययुक्तो भूत्वा प्रसन्नतापूर्वकं उदयन: कथयति—यत् अहं यदपि स्व नेत्राभ्याम् पश्यामि तत् किं सत्यं अस्ति न वा अथवा एष: स्वप्न: वर्तते। मया तु पूर्वं श्रुतं आसीत् यत वासवदत्ताया: यौगन्धरायणस्य च लावाणके ग्रामे अग्निकाण्डे मरणं सञ्जातं मृत्वा तु कोऽपि अस्मिन् संसारे पुन: न आगच्छति। अत: विचारयामि एष: स्वप्न: एव अस्ति, सत्यं न वर्तते।

**6.18 संस्कृत-व्याख्या—** उदयन: यौगन्धरायणं प्रति कथयति—नैव त्वया कोऽपि अपराध: कृत:। त्वं तु निरपराध: असि। अत: अस्मिन् विषये पश्चाताप: न कार्य:। पूर्व समये त्वया प्रमत्त: इव आचरणं कृत्वा अहं मोचित:। तदनन्तरं तेन सह युद्धस्थले पराक्रमपूर्वकं युद्धं कृत्वा स्वप्राणान् संकटे प्रापिता:। अनेकश: स्वयोजनया राज्यस्य अस्माकं च रक्षा कृता। वस्तुत: त्वया एव ये प्रयासा: विहिता: अस्माकं उपकारार्थं।

**6.19 संस्कृत-व्याख्या—** नाटकस्य अन्ते कवि: भरतवाक्यं प्रस्तौति—सर्वेषां राज्ञाम् श्रेष्ठ: अस्माकं महाराजा उदयन: सागरपर्यन्तविस्तृतां हिमालयविन्ध्याचलकर्णभूषणरूपेणधारणीं पृथिवीं एकच्छत्ररूपेण चक्रवर्तीरूपेण वा पालयुत रक्षां करोतु इति भाव:।

## अभ्यास:

**प्रश्न-1. समुचितं उत्तरं चिनुत-**

(1) का प्रतिहारी-

(क) वासवदत्ता (ख) घोषवती

(ग) विजया (घ) अङ्गारवती

(2) 'कथमदेशकालो नाम' कथयति-

(क) कञ्चुकी (ख) विदूषक:

(ग) उदयन: (घ) प्रतिहारी

(3) घोषवती का-

(क) वीणा (ख) परिचारिका

(ग) प्रतिहारी (घ) चेटी

(4) चिरप्रसुप्त: राज्ञ: काम: कया प्रबोधित:-

(क) पद्मावत्या (ख) वासवदत्तया

(ग) उज्जयिन्या (घ) वीणया

(5) राजधर्मस्यदेशिक: क:-

(क) उदयन: (ख) यौगन्धरायण:

(ग) दर्शक: (घ) महासेन:

**प्रश्न-2. एकेन पदनोत्तरत:-**

(1) षष्ठेऽङ्के प्रारम्भे क: प्रविशति।

(2) सूर्यमुखप्रासादात् क: अवतरति?

(3) श्रुतिसुखनिनदे कस्या सम्बोधनम्?
(4) सा देवी का यस्याः घोषवती प्रिया?
(5) ज्ञातकुलस्य कुशलवृतान्तं श्रोतुं मे प्रियम्। का कथयति?
(6) किं वक्ष्यतीति हृदयं परिशंकितं कः कथयति?
(7) षोडशान्तपुरज्येष्ठा का?
(8) राजसिंहः कः?
(9) 'शठः रुमण्वान्' केन कथितम्?
(10) एकातपत्राङ्का का?

**प्रश्न-3. एकवाक्येनोत्तरत-**

(1) प्रोषितभर्तृका का?
(2) अस्य स्निग्धवर्णस्य विपत्तिर्दारुणा कथम् इति किं दृष्टा केन कथितम्?
(3) अस्याः प्रतिकृत्या सदृशतयैव प्रतिवसतिः कया कस्याः कृते कथितम्?
(4) काले काले छिद्यते रुह्यते च व कस्य कृते कथनमिदम्।
(5) प्रायेण नरेन्द्र श्री सोत्साहैरेव भुज्यते प्रथमं पदं लिखत।

**प्रश्न-4. विशेषणं विशेषेण सह-योज्यम्-**

| | विशेषणम् | - | विशेष्यम् |
|---|---|---|---|
| (1) | परैरपहृत्तम् | - | माता |
| (2) | प्रवासदुःखार्ता | - | राज्यम् |
| (3) | काञ्चनम् | - | कथितानि |
| (4) | सस्मितानि | - | तोरणम् |
| (5) | परिशङ्कितम् | - | पुत्रः |
| (6) | भीतः | - | हृदयम् |

**प्रश्न-5. अधोलिखितानां पदानां प्रकृतिप्रत्यया: पृथक् पृथक् लेख्याः -**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (1) | उपस्थितौ | ...................... | ...................... |
| (2) | भवति | ...................... | ...................... |
| (3) | सुप्ता | ...................... | ...................... |
| (4) | उपगूहितानि | ...................... | ...................... |
| (5) | कथितानि | ...................... | ...................... |
| (6) | प्रतिबोधितः | ...................... | ...................... |
| (7) | आनय | ...................... | ...................... |
| (8) | विदितः | ...................... | ...................... |
| (9) | दर्शनीया | ...................... | ...................... |
| (10) | वक्ष्यति | ...................... | ...................... |
| (11) | भीतः | ...................... | ...................... |
| (12) | अपहृतम् | ...................... | ...................... |

| | | | |
|---|---|---|---|
| (13) | देव्याः | ........................ | ........................ |
| (14) | देव्या | ........................ | ........................ |
| (15) | वत्सान् | ........................ | ........................ |

**प्रश्न-6. अधोलिखितानां पदानाम् पर्यायाः लेख्याः -**

**ज्ञाति, परिधानम्, कातरः**

**प्रश्न-7. अधोलिखितानाम् समस्त पदानां समास विग्रहः समास नामानि लेख्यानि-**

| | समस्तपदानि | समासविग्रहः | समासनाम |
|---|---|---|---|
| (1) | सगोत्रम् | ........................ | ........................ |
| (2) | वासवत्ताधात्री | ........................ | ........................ |
| (3) | सूर्यमुखप्रासादः | ........................ | ........................ |
| (4) | मोहप्रत्यागतेन | ........................ | ........................ |
| (5) | मिश्रविष्कम्भकः | ........................ | ........................ |
| (6) | विकीर्णदण्डा | ........................ | ........................ |
| (7) | स्थानान्तरसुखानि | ........................ | ........................ |
| (8) | चिरप्रसुप्तः | ........................ | ........................ |
| (9) | शिल्पिजनः | ........................ | ........................ |
| (10) | जनितरोषः | ........................ | ........................ |
| (11) | प्राप्तकालः | ........................ | ........................ |
| (12) | अतिमात्रम् | ........................ | ........................ |
| (13) | अरोगाः | ........................ | ........................ |
| (14) | देहान्तरम् | ........................ | ........................ |
| (15) | तुलयधर्मः | ........................ | ........................ |

**प्रश्न-8. अधोलिखितान्वयस्य रिक्तस्थानि पूरयत-**

ये कातरा ................ वा अशक्तातेषु .................. न जायते।
हि प्रायेण ........................ सोत्साहै ................ भुज्यते॥

**प्रश्न-9. श्लोकस्य पादपूर्तिः करणीयः-**

कः कं रक्षितु मृत्युकाले ....................................।
.............................. काले काले छिद्यते रुह्यते च॥

**प्रश्न-10. ''स्वप्नवासवदत्तम्'' नाटकस्यन्तिमोऽङ्कस्य सारांशः लेख्यः।**

**प्रश्न-11. ''स्वप्नवासवदत्तम्'' इति नाटकस्य षष्ठेऽङ्के कति पात्राणां मञ्चे समावेशः तेषां नामानि लिखत।**

**प्रश्न-12. उदयनस्य चरित्र-चित्रणं कुरुत।**

**प्रश्न-13. 'स्वप्नवासवदत्तम्' नाटके कः रसः? व्याख्यां कुरुत।**

## योग्यताविस्तार:

### अग्निपुराणे ऊनत्रिंशदधिकत्रिशततमे अध्याये शृंगारादिरस निरूपणम्

अक्षरं परमं ब्रह्म सनातनमजं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्॥1॥

आनन्द: सहजस्तस्य व्यज्यते स कदाचन।
व्यक्ति: सा तस्य चैतन्यचमत्काररसाह्वया॥2॥

आद्यस्तस्य विकारो य: सोऽहङ्कार इति स्मृत:।
ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम्॥3॥

अभिमानाद्रति: सा च परिपोषमुपेयुषी।
व्यभिचार्य्यादिसामान्यात् शृङ्गार इति गीयते॥4॥

तद्भेदा: काममितरे हास्याद्या अप्यनेकश:।
स्वस्वस्थादिविशेषोत्थपरिपोषस्वलक्षणा:॥5॥

सत्त्वादिगुणसन्तानाज्जायन्ते परमात्मन:।
रागाद्भवति शृङ्गारो रौद्रस्तैक्ष्ण्यात्प्रजायते॥6॥

वीरोऽवष्टम्भज: सङ्कोचभूर्बीभत्स इष्यते।
शृङ्गाराज्जायते हासो रौद्रात् तु करुणो रस:॥7॥

वीराच्चाद्भुतनिष्पत्ति: स्याद् बीभत्साद् भयानक:।
शृङ्गारहास्यकरुणा रौद्रवीरभयानका:॥8॥

बीभत्साद्भुतशान्ताख्या: स्वभावाच्चतुरो रसा:।
लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा॥9॥

अपारे काव्यसंसारे कविरेव प्रजापति:।
यथा वै रोचते विश्वं तथेदं परिवर्त्तते॥10॥

शृङ्गारी चेत् कवि: काव्ये जातं रसमयं जगत्।
स चेत् कविवीतरागो नीरसं व्यक्तमेव तत्॥11॥

न भावहीनोऽस्ति रसो न भावो रसवर्जित:।
भावयन्ति रसानेभिर्भाव्यन्ते च रसा इति॥12॥

❖ ❖ ★ ❖ ❖

# परिशिष्टम्-1
## (नाटकीय-विशिष्ट-वस्तु-लक्षणानि)

**1- नान्दी-**

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥
माङ्गल्यशङ्खचक्राब्जकोशकैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥

**2- प्रस्तावना-आमुखम्-**

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥

**3- सूत्रधारः-**

आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुना।
रङ्गप्रसाधनप्रौढः सूत्रधार इवोदितः॥
नाट्योपकरणादीनि सूत्रमित्यभिधीयते।
सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः॥

**4- प्रयोगातिशयः-**

यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तथा॥

**5- नेपथ्यः-**

कुशीलवकुटुम्बस्य गृहं नेपथ्यमुच्यते।

**6- विष्कम्भकः-**

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः।
मध्यमेन मध्यमाभ्यां पात्राभ्यां संप्रयोजितः।
शुद्धः स्यात् स तु संकीर्णो नीचमध्यमकल्पितः॥

**7- प्रवेशकः-**

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषः विष्कम्भके यथा॥

**8- स्वगतम्-**

अश्राव्यं खलु यद् वस्तु तदिह स्वगतं मतम्।

**9- प्रकाशम्-**

सर्वश्राव्यं प्रकाशः स्यात्।

**10- विदूषकः-**

कुसुमवसन्ताभिधः कर्मवपुवेषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः॥

**11- नायकः-**

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्ग्मी रूढवंशस्थिरो युवा॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसंमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥

**12- नायिकाः-**

अथ नायिका त्रिभेदा स्यात् स्वान्या साधारणा स्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता॥

**13- अङ्कः-**

अङ्क इति रूढशब्दो भावै रसैश्च रोहयत्यर्थान्।
नानाविधानयुक्तो यस्मात् तस्माद् भवेदङ्कः॥
यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहरः।
किञ्चिदवग्लानबिन्दुः सोङ्क इति सदाऽवमन्तव्यः॥

❖ ❖ ★ ❖ ❖

# परिशिष्टम्-2
## महाकविभासस्यान्यनाटकेषु सुभाषितानि

परचक्रैरनाक्रान्ता धर्मसंकरवर्जिता।
भूमिभार्तरमापन्नं रक्षिता परिरक्षिति॥ **प्रतियौगन्धरायणम् 1-9**

काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खनयमाना ददति।
सोत्साहानाम् नास्त्यसाध्यं नराणां
मार्गरब्धा सर्वयत्ना: फलन्ति॥ **प्रतियौगन्धरायणम् 1-18**

स्वैरं हि पश्यन्तु कलत्रमेतद्वाष्पाकुलाक्षैर्वदनैर्भवन्त:।
निर्दोषदृश्या हि भवन्ति नार्यो यज्ञे विवाहेव्यसनेवने वा॥
**प्रतिमानाटकम्-1-29**

अनुचरति शशाङ्कं राहुदोषेऽपि तारा
पतति च वनवृक्षे यति भूमिं लता च।
त्यजति न करेणु: पङ्कलग्नं गजेन्द्रम्
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्य:॥
**प्रतिमानाटकम्-1-25**

लुब्धोऽर्थवान् साधुजनावमानी
वणिक् स्ववृत्तावति कर्कशश्च।
वस्तस्य गेहं यदि नाम लप्स्ये
भवामि दु:खोपहतो न चित्ते॥ **चारुदत्तम्-3-7**

सुखं हि दु:खान्यनुभूय शोभते
यथान्धकारदिव दीपदर्शनात्।
सुखान्तु यो याति नरो दरिद्रतां
धृत: शरीरेण मृत: स जीवति॥ **चारूदत्तम् 1-3**

ब्रह्मा ते हृदयं जगत्त्रयपते! रुद्रश्च कोपस्तव
नेत्रेचन्द्रदिवाकरौ सुरपते जिह्वा च ते भारती।
सब्रह्मेन्द्रमरुद्गणं त्रिभुवनं सृष्टं त्वयैव प्रभो
सीतेयं जलसम्भवालयरता विष्णुर्भवान् गृह्यताम्॥ **अविमारक नाटकम् 6-30**

❖ ❖ ★ ❖ ❖

# ''स्वप्नवासवदत्तम्''
## नाटकेऽङ्कानुसारं श्लोकाः

### प्रथमाऽकः

| श्लोकाः | छन्दांसि |
| --- | --- |
| उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।<br>पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥1 ॥ | आर्या |
| भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।<br>धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥2 ॥ | अनुष्टुप् |
| धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-<br>र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।<br>उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः<br>कोऽयं भो! निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ॥3 ॥ | शार्दूलविक्रीडितम् |
| पूर्वं त्वयाप्यभिमतं गतमेवमासी-<br>च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।<br>कालक्रमेण जगतः परिवर्तमाना<br>चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥4 ॥ | वसन्ततिलका |
| परिहरतु भवान् नृपापवादं, न परुषमाश्रमवासिषु प्रयोज्यम्।<br>नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति ॥5 ॥ | पुष्पिताग्राः |
| तीर्थोदकानि समिधः कुसुमानि दर्भान्<br>स्वैरं वनादुपनयन्तु तपोधनानि।<br>धर्मप्रिया नृपसुता न हि धर्मपीडा-<br>मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥6 ॥ | वसन्ततिलका |
| प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।<br>भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥7 ॥ | अनुष्टुप् |

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥8॥ शार्दूलविक्रीडितम्

कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रैर्नाहं काषायं वृत्तिहेतोः प्रपन्नः।
धीरा कन्येयं दृष्टधर्मप्रचारा शक्ता चारित्रं रक्षितुं मे भगिन्याः॥9॥ वैश्वदेवीछन्दः

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥10॥ अनुष्टुप्

पद्मावती नरपतेर्महिषी भवित्री
दृष्टा विपत्तिरथ यैः प्रथमं प्रविष्टा।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्या-
न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि॥11॥ वसन्ततिलका

विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः॥12॥ शार्दूलविक्रीडितम्

नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाऽप्यदग्धा॥13॥ शालिनी

अनाहारे तुल्यः प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥14॥ शिखरिणी

सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥15॥ अनुष्टुप्

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च सङ्क्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥16॥ शिखरिणी

## चतुर्थोऽङ्कः

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
 दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
 पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥1 ॥ शार्दूलविक्रीडितम्

ऋज्वायतां च विरलां च नतोन्नतां च सप्तर्षिवंशकुटिलां च निवर्तनेषु।
निर्मुच्यमानभुजगोदरनिर्मलस्य सीमामिवाम्बरतलस्य विभज्यमानाम् ॥2 ॥ वसन्ततिलका

मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः।
पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः ॥3 ॥ आर्या

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥4 ॥ आर्या

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निःसृता ॥5 ॥ अनुष्टुप्

दुःखं त्यक्तुं बद्धमूलौऽनुरागः स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह बाष्पं प्राप्ताऽऽनृण्या याति बुद्धिः प्रसादम् ॥6 ॥ शालिनी

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥7 ॥ अनुष्टुप्

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभादेयं स्त्रीस्वभावस्तु कातरः ॥8 ॥ अनुष्टुप्

गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ॥9 ॥ अनुष्टुप्

## पञ्चमोऽङ्कः

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
 कालक्रमेण पुनरागतदारभारः।
लावाणके हुतवहेन हृताङ्गयष्टिं
 तां पद्मिनीं हिमहतामिव चिन्तयामि ॥1 ॥ वसन्ततिलका

रूपश्रिया समुदितां गुणतश्च युक्तां
 लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
 पद्मावतीमपि तथैव समर्थयामि ॥2 ॥ वसन्ततिलका

ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख! सर्पम्।
मन्दामिलेन निशि या परिवर्तमाना
किञ्चित् करोति भुजगस्य विचेष्टितानि ॥3 ॥ वसन्ततिलका

शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।
रोगे दृष्टिविलोभनं जनयितं शोभा न काचित् कृता
प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ॥4 ॥ शार्दूलविक्रीडितम्

स्मराम्यवन्त्याधिपतेः सुतायाः प्रस्थानकाले स्वजनं स्मरन्त्याः।
बाष्पं प्रवृत्तं नयनान्तलग्नं स्नेहान्ममैवोरसि पातयन्त्याः ॥5 ॥ उपजाति

बहुशोऽप्युपदेशेषु यथा मामीक्षमाणया।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥6 ॥ अनुष्टुप्

निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः ॥7 ॥ अनुष्टुप्

शय्यायामवसुप्तं मां बोधयित्वा सखे! गता। अनुष्टुप्
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता ॥8 ॥

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद्, विभ्रमो ह्यस्तु मे चिरम् ॥9 ॥ अनुष्टुप्

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥10 ॥ अनुष्टुप्

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥11 ॥ अनुष्टुप्

भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा, वत्साश्च हस्ते तव ॥12 ॥ शार्दूलविक्रीडितम्

उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम्।
विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि ॥13 ॥ उपेन्द्रवज्रा

## षष्ठोऽङ्कः

श्रुतिसुखनिनवे! कथं नु देव्याः स्तनयुगले जघनस्थले च सुप्ता।
विहगगणरजोविकीर्णदण्डा प्रतिभयमध्युषिताऽस्यरण्यवासम्॥1॥ पुष्पिताग्रा

श्रोणीसमुद्वहनपार्श्वनिपीडितानि खेदस्तनान्तरसुखान्युपगूहितानि।
उद्दिश्य मां च विरहे परिदेवितानि वाद्यान्तरेषु कथितानि च सस्मितानि॥2॥ वसन्ततिलका

चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।
तां तु देवीं न पश्यामि यस्या घोषवती प्रिया॥3॥ अनुष्टुप्

किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः॥4॥ वसन्ततिलका

सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः॥5॥ वसन्ततिलका

पृथिव्यां राजवंश्यानामुदयाऽस्तमयप्रभुः।
अपि राजा स कुशलो मया काङ्क्षितबान्धवः॥6॥ अनुष्टुप्

कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥7॥ अनुष्टुप्

अहमवजितः पूर्वं तावत् सुतैः सह लालितो
दृढमपहृता कन्या भूयो मया न च रक्षिता।
निधनमपि च श्रुत्वा तस्यास्तथैव मयि स्वता
ननु यदुचितान् वत्सान् प्राप्तु नृपोऽत्र हि कारणम्॥8॥ हारिणी

षोडशान्तःपुरज्येष्टा पुण्या नगरदेवता।
मम प्रवासदुःखार्ता माता कुशलिनी ननु?॥9॥ अनुष्टुप्

कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति?
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥10॥ शालिनी

महासेनस्य दुहिता शिष्या देवी च मे प्रिया।
कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि॥11॥ अनुष्टुप्

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि।
अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः ॥12॥ अनुष्टुप्

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्?
इदं च मुखमाधुर्यं कथं दूषितमग्निना? ॥13॥ अनुष्टुप्

यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।
परस्परगता लोके दृश्यते रूपतुल्यता ॥14॥ अनुष्टुप्

प्रच्छाद्य राजमहिर्षीं नृपतेर्हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे ॥15॥ वसन्ततिलका

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः ॥16॥ अनुष्टुप्

किन्नु सत्यमिदं स्वप्नः, सा भूयो दृश्यते मया।
अनयाऽप्येवमेवाहं दृष्टवा वञ्चितस्तदा ॥17॥ अनुष्टुप्

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः ॥18॥ अनुष्टुप्

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥19॥ अनुष्टुप्

❖ ❖ ★ ❖ ❖